तर्कभाषा व्याख्या

मुक्तिरिम द्वीयप्रत्यक्षपरिच्छेद आरंभः ॥ हयग्रीवाय नमः ॥ छ ॥ ०

हरिः ॐ ॥ पद्मनाभपदांभोजरजःसामनुसेवमानः ॥ नत्वेशानुज्ञालाभ्यालानत्सादपंकजं ॥ १ ॥ गंगाधरपितुर्नत्वाचरणौमुरवैरिणः ॥ व्याख्यानंनत्वेभाषायाःक्रियतेसिद्धलुप्तये ॥ २ ॥ प्रारप्सितप्रतिबंधकविघ्नविघातद्वारेष्टदेवतानमस्कारूपंमंगलंमनसिविधायप्रेक्षावत्प्रवृत्यर्थं इतरग्रंथादतिरायंदर्शनेकविषयाधनुबंधचतुष्टयंदर्शयति ॥ बालेपीति ॥ तत्रापिपूर्वस्तुविरोध्याभासालंकाराय ॥ नतुबालस्यजानमात्रस्यन्यायशास्त्रप्रवेशोऽधीतसंभवति ॥ साहिदृष्टसाधनाज्ञानसाध्या ॥ नच नानुभवरूपं ॥ अनुभावकाभावात् ॥ नापिस्मृतिरूपं ॥ अननुभवात् ॥ नचस्तन्यपानप्रवृत्तौयथास्मरणंतथेहापीतिवाच्यं ॥ तत्रजीवनान्यथानुपपत्तिलक्षणाप्रमाणेनतत्कल्पनात् ॥ प्रस्तुतचेष्टादिनातदनुमानाच्च ॥ नचत्रप्रमाणंकिंचिदप्यिहभवतीतिवाच्यं ॥ तत्रिहापूर्वस्तुबालग्रहणेनअधीतन्यायव्याकरणाअनधीतन्यायशास्त्रस्यग्रहणादृष्टव्यः ॥ अत्रतृतीयेभाधेसनेनयोऽनुपपद्यार्थोविषयाइतिध्वनितं ॥ प्रवृत्तौवांछनीयत्वेनत्रा स्त्रप्रवेशएवप्रयोजनस्तचिंतं ॥ बालग्रहणेनअधिकारिदर्शितः ॥ तस्यरूपेसनेनप्रयोजनस्यग्रंथस्यकार्य

यंकारणाभावसंबंधःसूचितः ॥ तत्रभाषेसनेनषष्ठीगर्भेणपदार्थग्रंथयोःप्रतिपाद्यप्रतिपादकभावश्च ॥ संक्षिप्तेयंव्याख्येयेनसुलभंचित्तेतिनत्वेभाषाविरोधेपीनत्वादरस्यंहेयपार्थक्यंचफलंप्रकर्षादर्शनंग्रंथस्यवधेयं ॥ ननुकेतेपदार्थाःकिंप्रमाणंकायंकरमवनारयतीति ॥ प्रमाणेति ॥ केचिन्ननुशास्त्रमेवनिष्फलंकिमर्थंतत्त्वज्ञानार्थंअयमारंभइत्यतआह ॥ प्रमाणेत्याहुः ॥ अत्रसूत्रेसर्वपदार्थसाधारणत्वंहेयत्वसमासःकर्मधारयादौपूर्वपदार्थानांविरोधेपतयाअप्राधान्यापत्तेः ॥ हेयंहेयंचयथायथंएकत्वबहुत्वानिक्षोध्याभि ॥ ननुनित्यंश्रेयोनिश्रेयसमितिव्युत्पत्त्यानिश्रेयससंसुखं ॥ तस्यअधिगमोज्ञानेप्राप्तिर्वातत्त्वज्ञानादेवपंक्तेस्तआह ॥ अस्यार्थइति ॥ तत्त्वज्ञानार्थिति ॥ तत्त्वंज्ञायतेअनेनेतिव्युत्पत्त्यातत्त्वज्ञानंशास्त्रमित्यर्थः ॥ तेनशास्त्रेइष्टसाधनताज्ञानात्प्रवृत्तिरूपपादितावहति ॥ अन्यथातत्त्वज्ञानस्यस्वतोऽर्थपरत्वेशास्त्रेइष्टसाधनत्वतात्पर्यानुपपत्तेःतत्त्वज्ञानार्थंएतत्सकलारंभस्याहिनभावः ॥ नचोत्तरग्रंथविरोधः ॥ तस्यअन्यथैवावतार्यतात्पर्यात् ॥ ननुशास्त्रप्रवेशादपिपदार्थतत्त्वज्ञानमेवसाध्यं ॥ तस्यसूत्रपाठ

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

पुरारिश्च ॥२॥

देवजाने॥अतः स्तम्बेरमवानर्थकः॥तदर्थेऽपि तत्कर्णादिभस्तु दूरतोपास्तसत्त्व
आह॥नचेति॥त्रिनिर्देशेति॥यावत्स्याच्चेतनत्वेपि नदृष्टयपि त्रकृत्तेस्त्रिवि
धेत्यर्थः॥यद्वाप्रवृत्तिपदेऽपि प्रवृत्तिपरं॥यावत्स्यानरस्यविभागेनसहिनाचतुर्थी
प्रवृत्तिरित्यस्यलक्षं॥उद्देशस्थितिः॥अत्रकीर्त्तनंशब्दः॥तावन्मात्रस्यलक्ष
णत्वेऽव्याप्तिरितिव्याप्तिः॥नदर्थंस्वकीर्त्तनमिति॥तदर्थश्रवणात्मकशब्दे
मावन्मात्रस्यलक्षणत्वंआकुत्रेत्यादिनोद्धृतं॥अतोवक्ष्यति॥तथाच
वस्तुप्रतिपादकशब्दस्यलक्षणमित्यर्थः पर्यवस्यति॥तावन्मात्रस्यल
क्षणत्वेलक्षणाबाकेयेतिव्याप्तिः॥अतोनाममात्रेणेति॥अत्रवंदेति॥ना
ममात्रेणास्यअसाधारणधर्मानुपरागेणेत्यर्थः॥नचपृथिवीपदे
पृथिव्युद्देश्यात्मकेपृथिवीत्यादिरूपासाधारणधर्मानुपरागेणैवव
स्तुप्रतिपादकत्वादसंभवइतिवाच्यं॥लक्ष्यतावच्छेदकनिरूक्तासाधा
रणधर्मानुपरागेणावस्तुप्रतिपादकशब्दस्यविविक्षितत्वात्॥ राम
॥२॥

अतएवप्रमेयमितिपदेनप्रथिव्युद्देश्यं॥प्रमेयपदेनलक्ष्यतावच्छेदकनिरूक्तस्यासाधा
रणधर्मस्योपरागेणैवशब्दस्यतात्पर्यात्॥नचप्रथिवीत्ववतिपृथिवीयत्रलक्ष
णावाकेयेतिव्याप्तिः॥नत्रापिलक्ष्यतावच्छेदकनिरूक्तासाधारणधर्मानुपरागे
णावस्तुप्रतिपादनात्॥लक्ष्यतावच्छेदकलक्षणयोरभेदइतिवाच्यं॥नादृश
लक्षणवाक्यस्याभावात्॥अन्यथालक्ष्यतावच्छेदकलक्षणयोरेकैवलक्षणे
नेतरभेदसाधनेनसिद्धग्रहणदोषान्यामेवच लक्ष्यतावच्छेदकसामानाधिकरण्येन
साध्यसिद्धिरूपस्यानुमानप्रयोजनस्यजातिलक्षणेनसिद्ध्यसाधनतापत्तेः॥नचयत्र न
सिसाधयिषयानुमानावतारःतत्रकागतिः॥संदेहघटितलक्ष्यतायाःविविक्षितत्वा
त्॥अन्यथोक्तरूपलक्षणविरोधापत्तेः॥नचइतरभेदानुमानेनान्वयव्याप्तिः॥किंतुव्य
तिरेकव्याप्तिः॥तत्रसाध्यसाधनयोःसहचाराज्ञानात्॥कथंसिद्धसाधनमि
तिवाच्यं॥अगृहीताभेदंपुरुषंप्रतिलक्ष्यतावच्छेदकनिरूक्तासाधारणधर्मानु
परागेणावस्तुप्रतिपादकशब्दस्यविविक्षितत्वात्॥नेष्ट॥अगृहीताभेद
प्रसक्तिरस्यवाक्यस्यलक्ष्यतावच्छेदकनिरूक्तासाधारणधर्मानुपरा

गोणवस्तुप्रतिपादनात्॥अतिव्याप्तेर्वज्रलेपायमानत्वान्नायंपक्षः॥किंतुना द्वितीयप्रह
मसामान्येपीत्यस्य स्वमात्रवाचकशब्देनेत्यर्थः॥तथाचनलक्षणा
वाक्येऽतिव्याप्तिः॥तेनैवपृथिवीत्वादिधर्मवैशिष्ट्येनापिपृथिवीप्रतिपादनात्॥ मात्र
नापिप्रमेयपदेतिप्रसंगः॥तेनस्वमात्रवाचकशब्देवैशिष्ट्येनपृथिव्यप्रति
पादनात्॥नापिपृथिवीतिवाक्येऽदृष्टजन्यत्वेऽतिव्याप्तिः॥तेनपृथिवी
मात्रवाचकशब्देवैशिष्ट्यमात्रेणापृथिवीप्रतिपादनात्॥नचप्रमेयमितिवाक्ये
प्रमेयोद्देशात्मके॥अव्याप्तिः॥तत्रप्रथममात्रपदार्थस्यासंभवादितिवाच्यं॥ना
त्रलक्षणासंभवेनतत्स्यादुद्देशत्वादिति॥लक्षणेतिति॥असाधारण्येन॥
साधारणधर्मः प्रतिपादकःशब्दोलक्षणात्मकंशास्त्रमितिस्वर्थः॥प्रथमवि
शेषणान्नप्रमेयमितिशब्देऽतिव्याप्तिः॥प्रतिपादकःशब्दइतिवासंभव
निरासः॥नचोद्देशइतिव्याप्तिः॥तद्विशेषणेसतीतिविशेषणात्॥यत्तुज्ञानावच्छे
दकानिरूप्येतिअसाधारणधर्मविशेषणान्नातिव्याप्तिरिति॥तन्न॥पृथिवी रास
॥२॥

त्वस्यनिरूपितनिलक्षणकर्मत्वेऽतिव्याप्तेरिति॥विचारइति॥विचारःप्रतिपादकश
ब्दइत्यर्थः॥परीक्षापरीक्षात्मकंशास्त्रमित्यर्थः॥तेनेतिपदेनोद्देशःप्रथमसूत्रेणै
वज्ञातइत्यर्थः॥नत्रापीति॥अवश्यंकर्त्तव्येलक्षणापरीक्षयेतिशेषः॥प्रमाण
स्यप्रथमंलक्षणकरणेहेतुमाह॥प्रथमंहीति॥तत्रहेयत्वेनशास्त्रमित्यभिप्रायः॥
प्रमाकरणंप्रमाणमितिलक्षणे॥करणंप्रमाणमितिलक्षणेचप्रमाकरणेपरमाण
वादावतिव्याप्तिः॥अतोमेतिति॥तानत्वलक्षणेतिशेषः॥अतोग्रहणं॥प्रमाप्रमाणमिति
केचक्षुरादावतिव्याप्तिः॥घटादिप्रमायांचअतिव्याप्तिः॥अतःकरणपदं॥न
नुअप्रकरणत्वंनामअविलंबेननार्थोत्पादकत्वंवाव्यापारवत्त्वंवा॥नाद्यः॥चक्षुरा
दावव्याप्तेः॥नस्यअविलंबेननार्थोत्पादकताभावात्॥नचरजस्तमःकारण
कलापसहितस्यतस्यअविलंबेनकार्योत्पादकताभावात्॥नोव्याप्तिरितिवाच्यं॥
एवहिघटाद्यैरचिंतथात्वादतिव्याप्तिप्रसंगादन्तीयः॥तनपत्र॥नचतत्र व्या
पाराभावान्नतथेतिवाच्यं॥चक्षुर्व्यापारीभूतस्यघटचक्षुसंयोगस्यैवनव्यापार
दुष्टत्वेतिव्याप्तिः॥

त्वात्॥ किंच आत्ममनःसंयोगरूपव्यापारवत्यतिव्याप्तिः॥ नच तज्जन्य एवालोकेऽपि॥ प्रसङ्ग०
घटालोकसंयोगरूपव्यापारेऽपि व्यापारवत्त्वातिव्याप्तिः॥ नच तज्जन्यत्वेसति तज्ज
न्यजनकत्वं॥ घटालोकसंयोगस्य तज्जन्यत्वेऽपि तज्जन्यजनकत्वाभावेन व्यापार
वत्ताभावान्नातिव्याप्तिरितिवाच्यं॥ अंधकारस्थघटग्रहणप्रसंगेन तत्स्वीकार
णतांगीकारात्॥ नच अंधकारस्थघटे नसह चक्षुसंयोगएवनास्ति॥ अं
धकारेऽपिप्रतियोग्यधिकरणेवाच्यं॥ अंधकारस्थपुरुषस्य आलोकस्थवस्तु
साक्षात्काराभावप्रसंगेन अंधकारस्थचक्षुःसंयोगस्य प्रतिबंधकत्वाभावात्॥
तस्माद्दिव्यालोकसंयोगस्य साक्षात्कारंप्रति नव्यापारत्वाद्दिव्यालोकेति व्याप्तिः स्वार
स्यादेव॥ अपिच शरीरस्यापि शरीरात्मसंयोगेन व्यापारवत्त्वेति व्याप्तिप्रस
ंगः॥ एतेन घटालोकादावतिव्याप्तिवारणायप्रमाकरणत्वावच्छेदेन व्यापारवत्त्वविव
क्षितमितिपरास्तं॥ आत्मशरीरप्राणादावतिव्याप्तेः॥ आत्मादौ अतिव्याप्तिवा
रणायप्रमामात्रंप्रति व्यापारत्वविवक्षितं॥ अत्रचभ्रमेऽपि व्यापारवत्त्वादतिव्याप्ति राम
३४ एवंघ्राणादावपि॥ प्राणशरीरसंयोगेन व्यापारवत्त्वादतिव्याप्तिः॥ ३ ॥५॥

त्वं नतर्हिघटेतिव्याप्तिः॥ तस्यप्रमाकरणत्वेनैवव्यापारवत्त्वात्॥ चक्षुरादावतिव्याप्ति
रि॥ तस्यप्रमंप्रतिव्यापारवत्त्वादितिचेत्॥ अत्रवदंति॥ व्यापारवत्वेसतिअ
नुभवत्वव्याप्यजात्यवच्छिन्नकार्यतानिरूपितकारणताश्रयत्वं॥ सयंतेचक्षुःसंनि
कर्षेतिवारणाय॥ इतिआत्मादेरतिव्याप्तिवारणाय॥ नचश्रोत्रेणशब्दज्ञानज
नेनव्यापाराभावाद्व्याप्तिरितिवाच्यं॥ शब्दस्यैवव्यापारत्वात्॥ नचश्रो
त्रेणशब्दासंताभावज्ञानजनेनव्यापाराभावात्पुनरप्यतिव्याप्तिरितिवा
च्यं॥ तत्रश्रोत्रमनःसंयोगस्यैवव्यापारवत्त्वात्॥ नचनैसएवशब्दसाक्षा
त्कारेनशब्दइतिवाच्यं॥ व्यापारत्वक्षणाक्रांतेनशब्दस्यापिव्यापारत्वादिति॥
नं न॥ व्यापारवत्वसतीतिपदवैय्यर्थात्॥ यथाचचक्षुःसंनिकर्षेनानुभव
त्वव्याप्यजात्यवच्छिन्नकार्यतानिरूपितकारणताश्रयत्वं॥ तथाअनुपय
मेवनिवेदयिष्यते॥ व्याप्यपदवैय्यर्थाच्च॥ अनुभवत्वंतुनैनेवसामंजस्या
त्॥ यत्वनुभवत्वव्याप्यजातिमदेकजातीयजन्यसकलज्ञानमात्रवृत्ति

कार्यतानिरूपितकारणताश्रयत्वं प्रमाणत्वं॥ अत्र आत्मादेर्नि
त्यत्वव्यभिचारवारणाय ज्ञानेत्यारभ्य सत्त इति॥ तत्र जन्यत्वमेव दोषरूपनिष्ठकार्यता
तंनिरूपितेति कारणताश्रयत्वान्नातिव्याप्तिः॥ तावत्तु केचिद्गते॥ अतः सकलेत्या
तावत्तु असंभवः॥ अत्रोच्यते॥ तावत्तु चक्षुरादावनुमित्यापकरणत्वादसं
भवस्यात्॥ तदर्थं च जातीयेति॥ तदपि ज्ञानत्वजात्यापेक्षजातीय जन्यज्ञान
मात्रवृत्ति कार्यतानिरूपितकारणताश्रयत्वं चक्षुरादेर्नास्ति॥ अनुमित्यादावक
रणत्वादनाहुः॥ अनुभवत्वसाक्षात्कारत्वाद्यजातिमदिति॥ साक्षादिति॥ अनु
भवत्वमादायासंभववारणाय॥ तेन फलदशार्भव्याप्यता लाभान्नदोषः॥ सदोषे
चक्षुरादावतिव्याप्तिवारणाय यथार्थेति चरमभागः॥ चक्षुः संनिकर्षेति
व्याप्तिवारणायकरणेति॥ तदर्थस्य व्यापारत्वं॥ तदपि प्रयोजकमात्रं॥ संनि
कर्षस्य दोषेंद्रियेचपूर्वं विशेषणेनैव अतिप्रसंगभंगाच्चरमविशे
षणवैयर्थ्यप्रसंगादिति॥ अतएव व्यापारवत्त्वे सति यथानुभवत्वव्य

यधर्मावच्छिन्नकार्यतानिरूपितकारणताश्रयत्वं प्रमाणत्वमिति परास्तं॥ लौ
किकसाक्षात्कारत्वंयथानुभवत्वव्याप्योधर्मः॥ तदवच्छिन्नकार्यतानिरूपित
कारणताश्रयत्वं व्यापारवत्त्वं॥ विशेषघटोदस्तीति अतिव्याप्तेः॥ धर्मपद
स्य जातिपरत्वे यथार्थपदस्य व्यापारवत्त्वेसतीत्यत्रैवेत्यर्थ इति॥ अत्र
क्रमः॥ अनुभवत्वनिरूपितजन्यतावच्छिन्नकार्यतानिरूपितकारणताश्रयत्वं प्रमाणत्वं॥
यस्यकार्यतानुभवत्वनिरूपितजन्यतावच्छेदकतेतियावत्॥ तथाचघटेति
व्याप्तिः॥ तत्कार्यतायालौकिकसाक्षात्कारत्वेनोपाधिनैवावच्छेदात्॥ ना
त्मादौ॥ तत्कार्यतायामपि जन्यात्मविशेषगुणत्वेनोपाधिनैवावच्छेदात्॥
नाप्यलौकिके॥ तत्कार्यतायामपि अलौकिकाभावतरलौकिकचाक्षुषसाक्षात्का
रत्वेनोपाधिनैवावच्छेदात्॥ नापिसंनिकर्षे॥ तत्कार्यतायामपि लौकिकचा
क्षुषसाक्षात्कारत्वेनोपाधिनैवावच्छेदात्॥ चक्षुरादौचनाव्याप्तिः॥ चक्षु

राद्विषङ्निरूप्यानुमानोपमानशब्दकार्यमानांक्रमेणचक्षुषलिङ्गसंज्ञघ्राण
श्रौत्रत्वमानुमानिकानुमितित्वोपमितित्वशाब्दत्वजातिभिः अवच्छेदकैतिः॥
स्मृतिर्वासनाजन्यासंस्कारस्यापिकार्यतावच्छेदकेति॥ तत्रातिव्याप्तिंवारयितुं अनुभव
त्वमुपात्तं॥ लौकिकप्रमाणस्यैवात्रलक्षणमभगवत्यपि व्याप्तिरितिसंक्षेपः॥ नन्व
ननुप्रमाणमित्यस्यापिप्रमाकरणमित्येवार्थः॥ तथाचअनन्वयश्लोकः॥ लक्ष्यलक्ष
णानिदर्शयाव्याप्तिमपरिहरति॥ अत्रेति॥ उत्तरत्रापिभावप्रधानोनिर्देशः॥ इतिश्रा
दः प्रकारीयः॥ प्रमाणमितिप्रमाणपदवाच्यमित्यर्थः॥ तेननोक्तअनन्वयदोषइत्य
र्थः॥ ननुकरणकारकयोविशेषः॥ कारकंचक्रियांकुर्वत्॥ नचात्रकापिक्रियाश्रू
यते॥ नन्विति॥ ननुप्रमाज्ञानंविनानतत्करणंज्ञानंघटयपदार्थज्ञानस्यघटय
पदार्थज्ञानसाध्यत्वादित्याशंक्यते॥ कापुनःप्रमेतिः॥ उत्तरमाह॥ उच्यतइति॥
यथार्थेति॥ ननुअनुभवप्रमेत्येवास्तुव्यर्थंयथार्थपदमतआह॥ यथार्थेति॥
ननुतथापियथार्थप्रमाइत्येवास्तु॥ अनुभवंकिमर्थमितस्तआह॥ अनुभवइति॥

यादृङ्निरूप्यायादृक्प्रकारकत्वविवक्षायांघटपटयोर्घटत्वादिनायथार्थसंशयहालंबनेअति
व्याप्तेः॥

ननुयथाशब्दोऽर्थसादृश्येनथार्थसदृशानुभवःप्रमाइतिलक्षणंजातं॥ अत्र
चार्थसादृश्यंसर्वात्मनासादृश्यंविवक्षितंयथाकथंचिद्वा॥ नाद्यः॥असंभवात्॥
नांत्यः॥ भ्रमेऽपिप्रमेयतदिनासादृश्यादतिव्याप्तिः॥ नचयोगार्थंमनपेक्षैवयथार्थ
त्वविशेष्यात्प्रकारकत्वमितिवाच्यं॥ यत्किंचिद्विशेष्यात्प्रकारकत्वविवक्षायां
घटपटयोर्घटत्वेनिसमहालंबनेऽतिव्याप्तेः॥ नापिभ्रमभिन्नत्वंयथार्थत्वं॥ धर्मि
ग्राहकप्रमायामव्याप्तेः॥ अन्योन्याभावस्याव्याप्यवृत्तित्वात्॥ नापिविशेष्यनिरू
पितासंतानाभावप्रतियोगिधर्मप्रकारत्वंयथार्थत्वं॥ संयोगेतिव्याप्तिः॥ अभा
वेव्याप्यवृत्तिविशेषणान्नदोषइतिचेन्न॥ गुणःसंयोगीतिभ्रमेव्याप्तेः॥ नि
र्गुणादौसंयोगप्रतियोगिसंतानाभावोव्याप्यवृत्तिरन्यएव॥ नतुप्रतियोगीचसंयोगः॥ नचैव
कारइतिवाच्यं॥ अधिकरणभेदेनअभावभेदाभावात्॥ अन्यथाअनंतता
भावकल्पनाप्रसंगात्॥ नापिविषयतासामान्याधिकरण्यंधर्मप्रकारकानुभ
वःप्रमा॥ निर्विकल्पकेव्याप्तेः॥ इदंत्वमादाय भ्रमेतिव्याप्तेश्च॥ विषयता

यानंगीकाराच्च ॥ अन्यथाविषयतांगरस्तिकोरूपानवच्छिन्नप्रसज्येतेति ॥ नापियत्र
यदस्तितत्रतस्यानुभवः प्रमा ॥ संयुक्तसमवायेनगंधवति जलेसमवायसंब
धविषयकगंधज्ञानस्यापिप्रमाप्रसंगात् ॥ नचयेनसंबंधेनयत्रयदस्ति ते
नेसंबंधेनतत्रतस्यानुभवः प्रमेतिविवक्षितमतोनायंदोषइतिवाच्यं ॥ अल
वच्छेदनरूक्षः संयोगीतिज्ञानेतिव्याप्तिः ॥ नचयदवच्छेदेनयेनसंबंधेनय
त्रयदस्तितदवच्छेदनतेनसंबंधेनतत्रतस्यानुभवः प्रमेतिवाच्यं ॥ पा क
दशायांदूरादनींस्यामोघटइतिभ्रमेतिव्याप्तिः ॥ तत्रापिघटत्वावच्छेदनस
वायसंबंधेनआमदशायांरूपवत्त्वस्यसत्त्वात् ॥ रूक्षः संयोगीतिज्ञानंदूर
मायामवच्छेदकविषयिण्याप्तिरुक्तेति ॥ नचयेनसंबंधेनयदवच्छेदेनय
स्मिन्कालेयत्रयदस्तितदवच्छेदनतेनसंबंधेनतस्मिन्कालेतत्रतस्यानु
भवः प्रमेतिविशेषणान्नदोषइतिवाच्यं ॥ अवच्छेदकात्मविषयकप्रमाया
मव्याप्तिस्तादवस्थ्यादितिचेन्न ॥ तेनसंबंधेनसत्त्वतद्धिरण्यसंबंधानवच्छे
दनतदवच्छेदेनसत्त्वतद्धिरण्यानवच्छेदनतस्मिन्कालेत्यत्रतद्धिरण्यकालान

वच्छेदनेतिविवक्षणादितिदिक् ॥ नन्वनुभवत्वाज्ज्ञानेनहीतप्रमाकर्थज्ञानंये
यतआह ॥ अनुभवइति ॥ स्मृतित्वानधिकरणंज्ञानमनुभवइत्यर्थः ॥ तेनस्म
रंतरेणातिव्याप्तिरितिध्येयं ॥ ननुप्रमाज्ञानेपिकरणाज्ञानाकर्थप्रमाणत्व
पांजुत्वयइतिरीकते ॥ किंपुनरिति ॥ उत्तरमाह ॥ साध्यकेति ॥ तदर्थमाह ॥ अति
रायेति ॥ उच्यतइति ॥ कारणालक्षणमितिशेषः ॥ नन्वत्रनियतपूर्व
किमर्थंअतआह ॥ साध्यकेति ॥ अन्यथाअनन्यथासिद्धेत्यपदकृत्यमाह ॥ तेन
रूपस्येति ॥ अन्यथाप्रकारांतरेणासिद्धेत्यक्षरयुक्तिमाश्रित्याह ॥ पट
रूपेति ॥ ननुदंडस्यस्वगतरूपंप्रतिजनकत्वेपिपटंप्रतिजनकत्वमस्तु ॥
अतआह ॥ पटेत्यपीति ॥ कल्पनागौरवादिति ॥ कल्पनायाः गौरवमह
त्वमप्राप्तिकल्पमितियावत् ॥ यंपुरस्कृत्येत्यादि अन्यथासिद्धेत्यनतल्ल
क्षणलक्षितायामप्राप्तिकल्पमितिकृतं ॥ कारणालक्षणंफलितं निगमय
ति ॥ तेनेति ॥ नन्विदंसामान्यलक्षणंविशेषलक्षणंवा ॥ नाद्यः ॥ सर्वविशेष
णवैयर्थ्यप्रसंगात् ॥ नचपरिशेषेणैवसर्वथा कारणेतिव्याप्तिग्राह्यमितस्व

योजनमिति निवाच्यं ॥ सर्वथाकारणत्वस्यासिद्धेः ॥ घटः इति अलौकिकसाक्षात्कारे प्रत्यासत्तित्वेनघटस्येव परिमाणवत्त्वेति अलौकिकसाक्षात्कारप्रत्यासत्तित्वे नपरिमाणस्यापि कारणत्वात् ॥ किं बहुना परमाणुपरिमाणेमहत्त्वजाय भावः नावयवस्य क्षतिः ॥ तत्रचप्रत्यासत्तिरेवस्यमेयेऽपीत्ये ॥ साचईदृशसंयु क्तसमवेतविशेषणता ईदृशसंयुक्तविशेषणतावा ॥ उभयथापिप्रत्यासत्य र्थत्वेनपरमाणुपरिमाणस्यकारणत्वमेवेति ॥ कथंसर्वथाऽकारणत्वमि ति ॥ अतएवउदनाचार्यैरप्यस्यकारणत्वंचान्यत्रेत्यादिसाधर्म्यव्याख्या नावसरेऽात्माधर्मो निरिच्छंप्रतिकारणत्वमितिव्याख्यातं ॥ अन्यथातदयु क्तंस्यात् ॥ नित्यः ॥ एवंहियत्नंप्रतिअनन्यथासिद्धनियतपूर्ववर्तित्वं नूप्रतिकारणमितिपर्यवस्यति ॥ नचैतदुपपद्यते ॥ क्वचित्कारणस्य क्वचित्क र्यस्यअनीदृशत्वेकअशक्यग्रहत्वादितिचेन्न ॥ अनुमानेनापितद्ग्रहसं भवात् ॥ नह्यशक्यग्रहत्वंदुष्टम् ॥ किंतु रूपदोषएव ॥ अत्र अनन्यथा सिद्धत्वमन्यथासिद्धिरहितत्वं ॥ अन्यथासिद्धश्चसप्तधेत्येके ॥ पञ्चधेत्य

नर्कत्व

श्रीराम

राज

॥८॥

समवायसंबंधावच्छिन्नशब्दाश्रितत्वेनवा ॥८

न्ये ॥ त्रिविधेत्यन्ये ॥ तत्रचरमएवज्ञायान् ॥ तथाहि ॥ यंपुरस्कृत्यचस्य पूर्वभावोवगम्येत ॥ तत्तेनान्यथासिद्धं ॥ यथादंडेनदंडत्वमन्यथासिद्धं ॥ अ न्यत्रकृतनियतपूर्ववृत्तिनएवकार्यंसंभवेत्सहभूतमन्यथासिद्धं ॥ अन्य थासिद्धइति ॥ एकंप्रतिपूर्ववृत्तित्वेगृहीतएवऽपरंप्रतिपूर्ववृत्तित्वंगृ ह्यते ॥ नतेनान्यथासिद्धं ॥ यथाऽाकाशमिति ॥ ननुकथंमिहमन्यथा सिद्धिः ॥ नचऽाकाशत्वेनकारणतैवगाधी ॥ नच शब्दसमवायिकारणा त्वमिति शुक्लान्यथासिद्धिरितिवाच्यं ॥ आकाशपदवाच्यत्वेनप्रथिव्या यष्टव्यतिरिक्तद्रव्यत्वेनवा ॥ आकाशमितिप्रमाविरोधित्वेनवाऽा काशस्यसुग्रहत्वादिति ॥ अन्यथाशब्दंप्रतित्वेनैवनरूपेण कारणतायग्र हेऽात्माश्रयापत्तेः ॥ नचऽाकाशस्यकारणत्वेऽाकाशोपस्थितौगाधी ॥ नतूपस्थितिश्चशब्दः समवायिकारणजन्यइत्यनुमानेनेतियत्ने वान्यथासिद्धिरितिवाच्यं ॥ शब्दः क्वचिदाश्रितइत्यनेनाप्याकाशोपस्थि

तिसंभवादिति चेन्न ॥ यद्यु कचिदाश्रितः इत्यनुमानं नाकाशोपरक्तापकर्षवा
संभवादिति चेन्न ॥ यद्यः कचिदाश्रितः इत्यनुमानं नाकाशोपरक्तापकर्ष
णादिना सिध्यसाध्यनात् ॥ नापि समवायेनाप्यसाध्ये परकीये ॥ संयुक्त
समवायमध्ये समवायस्य पतितत्वेनतथैव सिध्यसाधनप्रसंगात् ॥ समवाय
मात्रेणेति साध्ये परकीये ॥ तदपेक्षया समवायिकारणाजन्यद्रव्यस्यैव साध्यस्य
समीचीनत्वात् ॥ द्रव्यद्रव्यनादिनं प्रतिगुणादेस्तु हेतोरसिध्यत्वाच्च ॥ न
नु नथाभिनेदं लक्षणं ॥ इंद्रियसंयोगेप्रथमान्यथा सिध्धि सत्वेनाव्याप्तेः ॥ द्वि
तीयेतृतीयेन्यथा सिध्धि सत्वेनाव्याप्तेश्च ॥ खंडघटादौतदभावा
त् ॥ घटाभिजनकत्वेन जनकत्वाच्च ॥ किंचाकाशे संयोगादि कारणेऽव्या
प्तेः ॥ तत्रापि चर्मान्यथा सिध्धि सत्वेनऽनन्यथा सिध्धत्वाभावादिति ॥ न
च रूपांतरेणद्रव्यत्वादिना कारणत्वमिति वाच्यं ॥ अन्यथा सिध्धि सत्वेन
तस्यैववस्तुमत्रा कयत्वात् ॥ रूपांतरेणानदृष्टेति वाच्यं ॥ एवं हि घटादि
प्रतिरूपांतरेणान न्यथा सिध्धि सत्वे कारणत्वप्रसंगः ॥ न च रूपांतरेण

नासौघटमात्रंप्रतिपूर्ववर्तितेत्र कारणत्वात् ॥ ६

कारणत्वेप्रमाणाभावादिति वाच्यं ॥ तावत्प्रसिद्धमेवेति चेत् ॥ अत्रब्रूमः ॥ लक्षणत्वा भिम
तग्रहकबलवत्प्रमाणशून्यान्यथासिध्धिरहितत्वेसतिसर्वतार्थः ॥ अस्तिचावश्यंभावः
इंद्रियसंयोगादौ ॥ तत्रयद्यपियंपुरस्कृत्येत्यादिरूपान्यथासिध्धिरस्ति ॥ नतथापिबलवत्प्र
माणशून्या ॥ अपितुबलवत्प्रमाणसंविधित्वेनेति नाव्याप्तिः ॥ नापिघटादौकार्ये आका
शादावतिव्याप्तिः ॥ तत्रबलवत्प्रमाणशून्यान्यथासिध्धेर्जीवत्कलादिनिसर्वस्य
स्थौ ॥ नलुतथापिनियतपूर्वकृसंनपश्यामः ॥ तथाहि ॥ नराभ्रेतेव्याप्तिर्वारणायतन्तूंघय
तिशेषेन्यथासिध्धत्वादितिचेत् ॥ अत्रके चित् ॥ रासभएवघटविशेषंप्रतिअतिव्याप्ति
वारणायतदुपादानात् ॥ नचानन्यथासिध्धेरनंतद्वारणमितिवाच्यं ॥ तेनापिनव्या
रणात् ॥ तथाहि ॥ कावारासभेन्यथासिध्धिः ॥ नतावत्प्रथमान्नोयाच ॥ तयोरंकुम
शक्यत्वात् ॥ द्वितीयापरमवशिष्यते ॥ सापिनयथाश्रुता ॥ एवंहिरूपप्रागभावस्यगो
प्रतिहेतुत्वं स्यादिति ॥ किंतुऽवश्यकल्प्यमाननियतपूर्ववर्त्तित्वेनैवकार्यसंभवेत
त्सहभूतत्वेमितिविवक्षितं ॥ सावाचारासभे ॥ यथादंडादेरवश्यकत्वे सीघ्रोपस्थि
तिकत्वेन लघुत्वेनचतथारासभस्यापीति ॥ नचदंडादेरवश्यकत्वं बलवत्प्रमाणेन
नतुउक्तप्रकारकूटेन अतएवगंधंप्रतिरूपप्रागभावहेतुरितिशंकनीयं ॥ बलवत्

माणमन्वयव्यतिरेकाभ्यामेव तच्च घटविशेषप्रतिसन्धानस्यान्यथेवेति॥ ननु पूर्व
वृत्तित्वं प्रागभावावच्छिन्नसमयवृत्तित्वं॥ तत्र प्रागभावविशेषणं॥ उपलक्षणं वा
नाद्यः॥ प्रागभावेऽव्याप्तेः॥ नहि प्रागभावे प्रागभावः॥ आत्माश्रयात्॥
नाद्यः॥ उपलक्ष्यतावच्छेदकाभावादिति॥ तन्न॥ गुरुप्रतीतेरादौ नियतोपल
क्ष्यतावच्छेदकाभावेऽपि गुर्वादिनानुपलक्षणात्वदर्शनलाघवादिति केचित्॥ वस्तु
स्तु नियोग्यनधिकरणध्वंसानधिकरणसमवायत्वमेवोपलक्षणं॥
दकमिति नाप्यनुपपत्तिरितिध्येयं॥ ननु तथापि समवेतसमवायि
दमव्याप्तं॥ नहि समवेतसमवायः॥ आत्माश्रयइति चेन्न॥ समवायपदेन कालत
दुपाधिसाधारणसमवायस्यैव विवक्षितत्वेनतस्यापि नहि सित्वात्॥ अत्रेदं
वधिभाति॥ भवदीयं न्यूनमसिद्धिः॥ तथापि समग्रविशेषभागस्य करणं
त्वपश्यामः॥ तथाहि॥ नियतपदकस्मृतौ न रंगचते॥ उपलक्षणभिन्नअति
आप्तिवारणार्थं विशेषणव्यावर्तकलक्षणाकलक्षणमात्रोपलक्षणावश्यकत्वमवश्यं

वाच्यं॥ तथाच समवेतकपालवृत्तिमाणेन जन्यकपालभावादेतेन्यायेनैव नाशे किमर्थमि
न्तत्पदमुपादीयते॥ उच्यते॥ नाशेनापि तदवारणाय॥ नापि पूर्ववृत्तित्वभागप्रयोजनं॥ नचोत्तरभा
वित्वव्यतिरिक्तमेवतत्प्रयोजनमिति वाच्यं॥ तस्यापि पूर्वप्रतीतेर्नवारणात्॥ नापि | वा
सर्वथावृत्तावित्यादिवारणं तत्प्रयोजनं॥ तस्यापि पूर्वप्रतीतिकेनोदासीनत्वोपपत्तेः॥ उ
पपत्तेनापि विशेषणेन तदवारणात्॥ नचसर्वथावृत्तिरेव नपूर्वमिति वाच्यं॥ समव | नृसिं
यानधिकरणे ध्वंसवृत्तिस्तोषां ननु समवायेति॥ अन्यथा घटगुणान्प्रतिकारणता
नस्यात्॥ किंच जनन्यथासिद्धत्वमात्रस्यैव तस्य सर्वसाधारणस्य कारणपदप्रव
त्तिनिमित्तमविसंगच्छेत॥ अन्यथापूर्ववृत्तित्वस्यानुगतस्यैव कारणपदप्रवृत्ति
निमित्तत्वमपिनस्यात्॥ तस्मादन्यथासिद्धभावएवकारणत्वमिति॥ प्रसंगात्कार्य
मपि लक्ष्ययति॥ अनन्यथासिद्धेति॥ यद्वापूर्वभावस्य कार्यरूपावधिं निरूप्य
त्वेन तदज्ञानेकारणमपि अज्ञानस्य ग्रहे स्यात्तदर्थमवधिं लक्ष्यमिति॥ अनन्य
थासिद्धेतिमात्रोक्तौ तस्य वस्तुतस्तुच्छस्य कार्यरूपे भावइत्यत्र सका
रणकत्वमेव कार्यत्वं॥ नथाचात्माश्रयइत्यनाह॥ अनन्यथासिद्धेति॥ नन्व

नन्यथासिध्यत्वमन्यथासिध्यविरहः॥अन्यथासिध्यि श्च॥पूर्वोक्तैव वा॥अन्यावा-
नाथः॥पूर्वोक्तामन्यथासिध्यजानतस्कारणत्वाभिमतनिष्ठस्वकार्य निष्ठत्वज्ञा
घटस्यापिरासभकार्यतापत्तेः॥नांसः॥तदभिर्वचनात्॥नचमलोकार्यत्व
क्षणस्वस्यक्षप्रागभावप्रतियोगि कार्यमितिफलितोर्थः इतिवाच्यं॥तस्यापत्ति
र्थतादवाक्यार्थत्वाच्च॥विनिक्षायामपितन्नसंगच्छते॥प्रागभावत्वस्यलक्ष्यत
तेत्वेनात्माश्रयापत्तेः॥नचप्रागभावत्वमखंडमवेति नात्माश्रयत्वमिति
वाच्यं॥जातिछेदापत्तेः॥कार्यत्वस्यापिनथात्व संगवेपकृतलक्षणप्रणयना
नुपपत्तेश्च॥किंचकिंपश्चाद्भावित्वं नतावत्सर्वदत्तितवतश्चाद्भावित्वमपिप्रा
गभावानवच्छिन्नसमयवृत्तित्वमितिवाच्यं॥राद्धान्तव्याप्तेः॥नहितत्का
रणस्याकाशादेरस्तिप्रागभावोयेन तत्प्रागभावानवच्छिन्नसमयवृत्तित्व
व्याप्तिस्यात्॥तदप्यखंडमित्यपिपूर्वोक्तयुक्तेवापास्तं॥नचपश्चाद्भावित्वं
तध्वंसाधिकरणक्षणावृत्तित्वं॥घटादिरोधेव्याप्तेः॥कालादि कार्येऽव्याप्ते
श्चेति॥अजरंप्रतिभाति॥स्यादपिभवदुक्तरूपं॥यदिअनन्यथासिध्यत्वं

कार्यविशेषणंस्यात्॥नचैवं॥किंतुयत्वयस्मा[illegible]अनन्यथासिद्धेनियतपश्चा त्
द्भावित्वंतत्स्यकार्यमितिविवक्षितोर्थस्तेनोक्तदोषतदवस्थः॥रासभस्यान्यथा
सिध्यत्वादिति॥यद्यपिकिंचेसादि॥तदपिभावानवच्छेद्यनिबंधनं॥तथाहि॥
नत्पश्चाद्भावित्वंतदधिकरणक्षणार्ध्वसाधिकरणक्षणावृत्तित्वं तदधिकर
णक्षणावृत्तिकिंचित्सदार्ध्वंसाधिकरणक्षणवृत्तित्वंवेति॥यत्किंचिदेतत्॥अ
त्रापिनियतपूर्वक्षणेचिंसम्मितिदिक्॥परोक्तकारणलक्षणंदूषयितुंअनुवदि
ति॥यतिनि॥कार्यणानुकृतोयोऽन्वयव्यतिरेकोनौवियेतेयस्येतिविग्रहः॥अत्र
कार्यपदंयत्किंचित्कार्यपरं॥तेनयत्कार्यमनुकृत्यान्वयव्यतिरेकौनदृष्टकारण
मित्यर्थोलभ्यते॥तेनान्यकार्यमादायासंभवादिदंनलगतीत्येयं॥कार्यानुकृति
स्तत्कार्यान्वयव्यतिरेकप्राक्कालीनत्वं॥तेनकार्यान्वयव्यतिरेकप्राक्कालीनान्व
यव्यतिरेकप्रतियोगित्वंलक्षणवाक्यार्थः पर्यवस्यति॥तेनयत्सत्वेयत्सत्वमन्व
यः॥यच्चतिरेकेयच्चतिरेकस्तियथाश्रुतार्थः[illegible]सचनसंभवति॥कालोकार्य
व्याप्तिव्याप्तेः॥कालसत्वेआकाशसत्वस्यकेवलव्यतिरेकेकालव्यतिरेकस्यच्

नियतत्वात्॥ नचायमस्तेयदुपपत्तिरितिवक्तव्यमितिवाच्यं॥ उपपत्तेः॥ कारणघटित
लेनात्माश्रयापत्तेः॥ सव्येतरविषाणयोरितिव्याप्त्यश्च॥ रासभादावतिव्याप्तिश्च॥
क्वचित्तस्यापिनथात्वात्॥ नचनियमविवक्षायांनञ्नीकारइतिवाच्यं॥ अन्योन्या
पत्तेरितिदूषणञ्जातंपरास्तं॥ रासभादावतिव्याप्तिःमूपरमवरोध्यते॥ साप्य
नन्यथासिद्धपुरस्कारान्निरस्तेयेति॥ अतएवनन्मतेतमःकारस्यादुचिः॥
नद्वीजंचापरोक्षदोषस्यैवानुवृत्तौ मतिरेकेपरंचाधिर्कं भवतीति व्यर्थं
विशेषणात्॥ अन्यथासिद्धत्वमात्रमेवास्यकर्मकुलक्षणंइतिचेत्॥ अ
न्यथास्यनाकाशस्यस्वस्वव्याप्येसद्दिपरत्वेतस्यकालादिसाधारण
त्वेननिर्दुष्टत्वापत्तेरिति॥ व्यतिरेकेइति॥ ननुव्यतिरेकासंभवःकथं॥ व्योमा
दीनामवृत्तित्वेनतद्व्यतिरेकस्यकेवलान्वयित्वात्॥ नचाकाशादिसंयोगस्यभू
तलादौवृत्तित्वेनाकाशोपितत्रवर्त्ततइतिवाच्यं॥ अंगुलीद्वयसंयोगस्यपर
स्परवृत्तित्वेपि अंगुलयोःपरस्परावृत्तित्ववत् भूतलादौचाकाशसंयोग
स्यवृत्तावपिआकाशस्यावृत्तेः॥ अन्यथाभूतलस्याप्याकाशवृत्ति
र्नस्यात्॥ ननुइदानीमाकाशंनैतीयंआकाशस्यकालवृत्तिवदुइदानीमे

स्या

हेअवकाशइतिप्रतीत्यागृह्याकाशवृत्तिःस्यादेवेतिवाच्यं॥ गेहेअवकाशइति प्रतीतिःप्रत्यक्ष
कीवाअनुमानकीवा॥ नाद्यः॥ विशेष्यायोग्यत्वात्॥ नाद्यनीयः॥ लिंगाभावात्॥ आका
शागेहवृत्तिः तन्निष्ठसंयोगप्रतियोगित्वात्॥ घटवत्यनुमानात्॥ आकाशागेहवृत्तिरि
तिप्रतीतिःस्यादेवेतिचेन्न॥ एकांगुलिरंजपरांगुलिनिष्ठतन्निष्ठसंयोगप्रतियोगि
त्वाद्व्यक्तिविपक्षेवाधकाभावेनाप्रयोजकत्वात्॥ तस्माद्गेहेअवकाशइतिप्रतीतिः
वर्णाभावमवावलंबते॥ नत्वाकाशमिति॥ एवंस्थितेअवकाशवद्धंसभूतलमित्यादि
प्रतीतीनांआवरणाभावएवविषयोनत्वाकाशः॥ नचतर्हिअतिरिक्ताकाशेकाप्रत्या
शाआवरणाभावेनैवप्रतीतेरुपपत्तौतदितिवाच्यं॥ भ्रांतोसि॥ नहिप्रतीतिबलेनाका
शंसाधयामः॥ येनैवंनवप्रलापंनस्यात्॥ किन्तुशब्दरूपगुणसमवायिकारणत्वे
नाकाशंनिरूपयन्निवदृश्यते॥ एतदेवमनसिनिधायगौरवाच्चरोरप्यतिरिक्तमद
यंताभावाप्रतियोगित्वंकेवलान्वयिधर्मलक्षणत्वनाकारितिसंक्षेपः॥ तस्माच्छब्द
गुणस्यापतत्सर्पीयत्वेनमरुत्कुचोनास्पर्शः॥ कारणंविभजते॥ तच्चेति॥ तत्रेति॥
तेषुकारणेषुमध्येप्रथमंप्रधानतयासमवायिकारणत्वस्यवक्तव्यत्वादित्यर्थः॥ यत्स
मवेतमिति॥ यत्रयत्समवेतंकार्यमुत्पद्यतेतत्तस्यसमवायिकारणमित्यर्थः॥

अत्रयत्रयदुसंबंधेनसमवायीकारणमिहकपालेघटध्वंसाधुसंयोगेनिति अ
तिव्याप्तिरितिसमवेतपदं॥यत्रयत्समवेतंतिस्सन्कपालेघटेघटत्वसमवायवति अ
तिप्रसंगः॥तदर्थंउक्तंचतइति॥कार्यपदंस्पष्टार्थं॥लक्षणद्वयार्थंवा॥यद्वस्त्व
मान्यलक्षणमेवैतत्॥तदास्तसमवेतंजनकंतमुक्तंभवतीत्यर्थो ध्रुवंसयः इति
दिक्॥संयोगइति॥संयोगलस्यजातित्वेनसंयोगस्यसोऽयंपरस्थितिकर्मजन्यप्र
थममुदपादि॥अतएवतस्यसुगमत्वंस्वरूपतयातमुपेक्ष्यैवकर्मोदितंस्यात्पिसम
वायस्यदुरवबोधतयाप्रथमतःस्वरूपकथनंतत्रसंगच्छते॥अन्यथो
देशानुसारेणस्वरूपकथनोचितानदसंगतंस्यादितिध्येयं॥तत्रेति॥संयोगेऽति
व्याप्तिवारणायअयुतसिद्ध्येरिति॥घटकपालेज्ञानेतिव्याप्तिवारणायसंबं
ध्यपदंअयुतसिद्ध्यर्थंचपरस्परापेक्षार्थंविवक्षितं॥तेनसंयोगेतिव्याप्तिः॥ए
वमग्रेऽपि॥ययोरिति॥अत्रययोर्द्वयोर्मध्येएकस्यस्थितिरपरस्मिन्नवेति न
वयुतसिद्ध्योरित्युपव्याख्यानं॥अवयव्यादीनांमन्मतेऽतिप्रसादोत्तरमा
सः॥नापिययोर्द्वयोर्मध्येएकस्यापरत्रस्थितिरवेतिव्याख्यानं॥अवयवा

अन्योन्याश्रयप्रसंगात्॥नचभावयोरितिविरोधिनीतिव्याप्तिरितिवाच्यं॥८

दीनामनित्यतयास्थित्यसंबंधेभावाभावाद्व्याप्तेः॥नचाविनश्यत्कारणत्वेवयंना
सर्वंसामर्थ्यं॥तदर्थं हिविनश्यत्कारणत्वं॥नचयत्किंचिदविनश्यत्कारणत्व
संवासर्वंविनश्यत्कारणत्वंसकलंविनश्यत्कारणत्वंवा॥नाद्यः॥उक्तदोषापत्तेः॥
नद्वितीयः॥नित्यसमवायिनोऽतदप्रसिद्धेः॥नतृतीयः॥असंभवाच्चतथा
पियययोर्विद्यमानयोर्मध्येएकस्यापरत्रस्थितिरेवनहि॥अयुतसिद्धयोः॥योद्वौसंबंध
विककालेनस्तस्तौवेतिनार्थः॥नन्वाकाशघटसंयोगाभावयोरतिव्याप्तिः॥तयोरपिर्वि
द्यमानयोरपिमध्येएकस्यात्रस्थितिरवयवित्वं॥नचसमवायसंबंधेनस्थितिर्विवक्षिता
नत्रसंबंधेनेवस्थितिरितिवाच्यं॥कपालावयवघटयोरतिव्याप्तेः॥ननुपूर्व
क्तयुक्त्याघटसंयोगएवकपालावयववर्त्तते॥नघटइतिनातिव्याप्तिरितिचेन्न॥महा
जनपदयोरतिव्याप्तेः॥ननुतत्रापिनातिव्याप्तिः॥रागादीनांसर्वविद्यमानयोरपि
तयोरेकस्यापरत्रावस्थितिरितिचेन्न॥यत्रतंतुषुवेरागादीनितत्राप्यतिव्याप्तेरपरिहारा
त्॥सर्वभावकालयोरतिव्याप्तेर्वज्रलेपलाक्षेतिचेन्न॥ययोर्भावयोर्विद्यमानयो
स्तयोरेकस्यापरत्रजगदाधारतानियमकसंबंधसंयोगसंबंधातिरिक्तसंबंधेन

इत्तिरुत्पादकसिद्धाविति विवक्षितत्वात्॥ विनश्यत्तादिति॥ ननु विनाशसामग्रीविनश्यत्ताऽस्त्वास्तु॥ कुतस्तदधिकेनेति चेत्॥ अत्रकेचित्॥ इष्टापत्तिरित्याहुः॥ अन्येतुसमग्रीनसकलकारणसान्निध्यरूपा॥ येनव्यर्थं विशेषणात्॥ किंतुसकलतत्काल रूपा॥ तथाचसकलविनाशकारणसमवधानेविनश्यत्तेत्यर्थः पर्यवस्यति॥ नचात्र व्यर्थविशेषणत्वमेकेविपाहुः॥ वस्तुतस्तुसामग्रीपदंयथाश्रुतमेवनतुसकलतमं रूपं॥ नचैवंविशेषणवैयर्थ्यं॥ लक्षणद्वयतात्पर्यात्॥ विनाशसामग्रीविनश्यत्तेत्येतावत्॥ सकलपदमध्याहार्यं॥ सकलकारणसमवधानंविनश्यत्तेतिपरं॥ तत्रोत्तरसामान्यलक्षणं॥ तेनचक्षणादिकारणसमवधानेनातिव्याप्तिः॥ तस्यापिप्रागभावविनश्यत्तात्॥ प्रथमंचविनश्यत्तालक्षणंविशेषलक्षणं॥ तत्रविनाशंप्रतिमुख्यविनाशंप्रतिनातिव्याप्तिः॥ अतएवैकलक्षणद्वयप्रणयनंकिमर्थमितिरूषणंपरास्तं॥ सामान्यविशेषकारणादिति॥ नहिकुरीपटाश्रितेतिप्रसंगादुक्तं॥ प्रकृतेतस्यानुपयोगादिति ध्येयं॥ एवंपटसमवायेतंतुषु

तेन

विनाश

नाम ॥१४॥

सिक्ष्येपटकारणोदेवात्॥ तंतवादेःसमवायिकारणत्वंसिद्धमितिवक्तुमुपक्रमते॥ तदेवमिति॥ समवायिकारणालक्षणंरूपांतरेण्याहुः॥ पटश्रेणि॥ ननुसमवायिकारणंतंतुसमवेतकार्यजनकत्वं॥ जनकत्वंचनियतपूर्ववर्तित्वं॥ तच्चपटादिक्षणनास्तीव॥ समानकालीनत्वादितिनांकते॥ नत्वित्यादिना॥ कारणास्येसतेन॥ किंतुनिर्गुणमितिप्रा॥ ननुघटादावक्षणकालादिनींयापकंनास्तिनवा॥ आद्येनसंयोगरूपगुणवत्वात्कथंनिर्गुणत्वंजैनोऽपसिद्धांतइतिचेन्न॥ तेषांव्यापकत्वंतदानींघटसंयोगाभावात्॥ नचतर्हिव्यापकत्वमाकोपः॥ तदानींघटस्यमूर्त्तत्वाभावेनतद्व्याकोपत्वात्॥ कार्याद्यभावेनकारणबाधाच्च॥ नचाकाशकपालसंयोगात्॥ कथंघटाकाशसंयोगः कथंचनोसंघटइतिवाच्यं॥ समवायिकारणाभावात्॥ नचघटएवसमवायीकारणमितिवाच्यं॥ तस्यपूर्ववर्त्तित्वाभावेनाकारणत्वादितिदिक्॥ नन्वत्रैवकिंनियामकमित्यतोविपक्षेबाधकमाह॥ समानेति॥ नन्वेवंरूपणेनघटरूपादिनांसमानकालत्वंनस्यात्॥ तत्रापिसमानकालोसतोसामग्येकयेनभेदानस्यादितिसापाद्यानसंभवात्॥ नचसमानकालोसतावपिनसामग्येकयेअसमवायिकारणभेदात्सामग्याभावभेदाच्चेतिवाच्यं॥ प्रकृतेपितुल्यत्वादितिचेदाहुः॥ घटरूपादिघटाद्भिन्नोनवा॥ अंसेबाधः॥ भिन्नश्चेन्नकार्यीभूतोनवा॥ घटसमवायि

कारणकोनवा॥ कार्यमुत्पश्येनकपेतस्पर्शवत्वंनाक्षिपेत्॥ नोचेदन्यसमवायिकारणकोवाच्यः॥ भावकार्यस्यसमवायिकारणंजन्मन्यनियमात्॥ नचरूपालयैरन्यस्यासौभवात्॥ एवंचघटोरूपवानितिप्रतीतिर्नस्यात्॥ घटस्यप्रत्यक्षत्वानुपपत्तिश्च॥ एकरूपवतिकपालरूपानुदयाघटेति॥ अत्रेदंचिंत्यं॥ उक्तयुक्तेस्तकपालकल्पितातेष्वेवसंयोगस्यार्थत्वाभावात्॥ नासत्यकत्वमपिमूलसंयोगस्यनसंगच्छते॥ सामानाधिकरण्येनघटोरूपवानितिप्रतीत्युपपत्तेः॥ साक्षात्संबंधेनसाध्यमेव॥ जलसंयोगज्ञानवत्॥ तेनैवसंबंधेनरूपवत्त्वात्॥ प्रत्यक्षत्वमप्युपपद्यते॥ साक्षात्संबंधेनरूपवत्त्वस्यप्रत्यक्षत्वंनत्वनायागौरवात्॥ नतीमप्येकदेशेनेतिदुर्वचनं॥ तन्मतेघटरूपस्यकपालरूपंघटकपालरूपत्वमपितद्वयवरूपत्वात्॥ रूपत्वेनव्याप्यवृत्तेरेकरूपवतिरूपानुदयाच्चेति॥ अन्यत्तुगुणगुणिनोःघटघटरूपयोःसमानसामग्रीकत्वात्समानसमवायिकारणकत्वात्॥ कपालंरूपैकसमवायिकारणकत्वादितियावत्॥ घटस्यसमानकालीनत्वेनरूपसमवायिकारणत्वासंभवस्यतत्रैवोक्तत्वात्भेदोनस्यात्॥ घटरूपकपालरूपयोरितरेतरः॥ एकत्रैकदारूपद्वयस्यासमावेशादितिन्याय्यंचैतत्॥ नहिसमवायिकारणत्वंकार्यदेशत्वं॥ पूर्वोक्तप्रकारांतरेणापरास्तं॥ अपरेतुघटरूपयो

राम ॥१७५॥

समानकालोसतीत्युच्यमानायांसमानसामग्रीकत्वात्समानसमवायिकारणकत्वादेतन्न स्यात्॥ घटरूपस्यकपालरूपेणसमानसमवायिकारणकत्वेपिभेदासत्ताश्रयिचारादेतन्नवाच्यं॥ सत्तासाक्षात्क्रियमाणाजात्यवच्छिन्नप्रतियोगिताकभेदाभावस्यआपाद्यत्वेनविवक्षितत्वात्॥ तस्यतत्रापिसत्वेनव्यभिचारासंस्पर्शात्॥ नचकपालद्वयसंयोगघटस्योभयभिचारः॥ नथापिस्यादेवंतिवाच्यं॥ समानसमवायिकारणत्वेनसमानधर्मावच्छिन्नसमवायिकारणताकत्वस्यतिवक्षितत्वात्॥ कपालसंयोगघटयोर्नसमानधर्मावच्छिन्नसमवायिकारणताकत्वं॥ द्रव्यत्वेनसंयोगकारणतायाःकपालत्वेनघटकारणतायाश्चावच्छेदात्॥ अतएवनोक्तदोषः॥ कपालत्वावच्छिन्नसमवायिकारणताकयोःकपालकर्मघटयोर्व्यभिचारादितिचेत्॥ नदोषोक्षतेः॥ घटसमवायिकारणतायाःकपालत्वेनघटरूपसमवायिकारणतायाश्चवायुव्यभिचारस्यतुल्यत्वेनावच्छेदात्॥ घटतद्रूपयोःसमानधर्मावच्छिन्नसमवायिकारणतात्वस्यसिद्धेरपापादानासंभवात्॥ नचघटरूपसमवायिकारणतायाकपालत्वेनैवावच्छेदेतामनतिप्रसंगादितिवाच्यं॥ एवंहिकपालसंयोगस्यसमवायिकारणत्वेनापिकपालत्वेनैवावच्छेदेतामनतिप्रसंगादिति॥ कपालसंयोगघटयोर्व्यभिचारएव॥ किंचायुक्तंसिध्यत्वत्समवायित्वमन्यथासिध्यनियत

पूर्वसिद्धत्वाच्च कारणाद्भिन्नमर्थं समाजमहत्त्वसिद्ध्यर्थं समवायिकारणं नावयवी धर्मिग्राहकप्रमाणसिद्धिर्हि न्यायपथः ॥ वयं ब्रूमः ॥ समानकालीनसत्ताऽनुच्यमानाप्यंशगुणगुणिनोर्भेदानस्याद्विरोधानस्यादृश्यत्वं ॥ गुणतदाश्रयोः समानकालीनसत्ताऽनुपलब्धिवद्गुणतदाश्रययोरपि समानकालीनसत्तानुपलब्धिः स्यादिति भावः ॥ अत्रहेतुः समानसामग्रीकत्वादिति ॥ अत्रसामग्रीसमर्थनप्रकारः ॥ नथाच्चलनयसमर्थनप्रकारस्तत्तुल्यमुपलब्धत्वादित्यर्थः ॥ नचतत्रपूर्वपक्षिणोरुक्तापत्तिरिति वाच्यं ॥ नह्यापत्तेर्भेदाकरणीयत्वात् ॥ तथाहि ॥ यदि घटेपिस्वावयवसमानकालजन्मानंतदवयवापिस्वावयवसमानकालिनैजन्मा ॥ एवंतदवयवोपि ॥ एवंपरमाणुरनवस्थानं ॥ तथाचकपालादिरवांतरावयवीस्यात् ॥ नचचैषापत्तिर्मूर्त्तयोसमानदेशाविरोधेपि ॥ तत्रापिह्यापत्तेःपरमाणोर्द्व्यणुकेसमवेतत्वाच्च ॥ द्व्यणुकस्यसमानकालीनत्वेनसमवायिकारणत्वानुपपत्तेश्च ॥ तथाचात्रसरणेप्रहत्वेनसाध्यकारणमहत्त्वाभावानहुहुलाभावाच्च ॥ कार्यचतद्धितूरकणमहत्त्वदृश्यत्वं तथाचाप्रयोजकत्वप्रसंगः ॥ कारणमहत्त्वमतत्वाभावात् ॥ पूर्वोक्तसामानाधिकरण्यसंबंधेनापिमहत्त्वाभावात् ॥ अमुमेवार्थं घटोहित्यादिनास्यैवप्रकथ

यति ॥ कारणेति ॥ अत्रकार्यमंगीकार्यमनुमितियावत् ॥ तस्यभेदावेचित्र्यं गुणतदाश्रयोः समानकालीनजन्म ॥ निरुणद्धितदाश्रयोरिसर्वरूपं तस्य कारणभेदानियतत्वात् ॥ कारणमंगीकार्यभेदनियामकंयुक्तिरियावत् ॥ तस्यभेदावैचित्र्यं ॥ तदधीनत्वादित्यर्थः ॥ अंगीकारेचित्र्यस्यकुतोवैचित्र्यप्रयोज्यत्वादधीनत्वादिति निर्गलितार्थः ॥ अपरेतुकार्यभेदस्यसत्तासाक्षाद्व्याप्यत्वादिनास्यैवाधिनप्रतियोगिताकंकार्यभेदस्यकारणभेदनियतत्वंसमवायिकारणभेदव्याप्यत्वादित्यस्यैवाख्यानमाहुः पूर्वग्रंथानुसारेणायोजयंति ॥ तन्न ॥ कपालकर्मघट्यार्थभिचारादस्यरूपस्यहरंति ॥ तस्मादितिपदंतन्नेति ॥ प्रतिबंधिबीजाभावादित्याशयः ॥ पूर्वोक्तयुक्तेरुक्तेः स्वयमेवप्रकल्पतेति ॥ घटोहीति ॥ अत्रप्रथमघटपदंघटोभवसम्भवीतिस्वस्वाधेयकंबपरं ॥ तथाचघटावयवः घटप्रतिनिकारणं समानकालीनत्वादितिशेषः ॥ तथाचकपालाद्येतावयवस्यादितिभावः ॥ तदेवदृश्यतीति ॥ एकस्यैवेति ॥ एककालीनस्यैवेत्यर्थः ॥ सएवतकालीनएवतमेवतत्कालीनमेवेतीतिरूढेर्हेतोः ॥ तथाचेतद्भिन्नोयाघटः स्वगुणान्प्रतिपूर्वभावित्वात् ॥ समवायिकारणंभवेत्यर्थः ॥ यद्वाप्रसंगादाह ॥ तदितिकारणेत्यस्यैवेत्यर्थः ॥ कारणभेदमेवदर्शयतीति ॥ घटोहीति ॥ घटरूपस्यकारणंघटः ॥ घट

स्यचनघटकारणी ।। पूर्वापर्यो भावादिति ।। कारणभेदो वक्तव्य इति भावः ।। एतद्ध्यानबोधेऽउक्त
रग्रंथः सुगम एवेति कृतं विस्तरेणेति ।। नन्विति ।। ननु सगुणोत्पत्तिपक्षेऽपि प्रथमक्ष
णोदयमचाक्षुषमेव ।। प्रसक्षकारणाभूतस्यमहत्त्वस्यघटस्यपूर्वेक्षणेऽसत्त्वात्तयाभूतस्य
चकारणत्वे प्रमाणाभावादिति स्वं प्रत्यप्येषदोषः समवायकारइतिचेत् ।। अत्रेके चित् ।। प्रथम
क्षणाइत्यनंतरं निर्गुणोत्पत्तावुच्यमानायामितिशेषः ।। घटइत्यनंतरंचद्वितीयक्षणाइ
तिशेषः ।। अरूपिद्रव्यत्वादित्यस्यकपालक्षणकार्यस्यपूर्वंसत्त्वाभावादितियोजयंति ।। वा
युवदिति ।। दृष्टांतविरोधापत्तेः ।। दृष्टांतोह्यनुमाने ।। नच प्रथमक्षणावच्छिन्नपक्षकंद्वि
तीयक्षणावच्छिन्नपक्षकंवा ।। नाद्यः ।। पूर्वोक्तदोषप्रसंगात् ।। नद्वितीयः ।। स्वरूपा
सिद्धेरिति ।। वस्तुतस्त्वसदुत्कारणाल क्षणाभिप्रायेणेदं केयमितिमत्वप्रसंगदोषइ
त्यारुः ।। अरूपीति ।। द्रव्यत्वमात्रेस्थित्यापनघटव्यभिचारितिपूर्वपदं ।। नावमात्रेगुणादौव्य
भिचारितिद्रव्यपदं ।। नाऽव्यरूपित्वेरूपप्रागभाववति ।। रूपध्वंसवतिवा ।। रूपासमानाधि
करणवतिवा ।। नाद्यः ।। गुणादौव्यभिचारात् ।। भावेनञ्समेपदेवैय्यर्थापत्तेः ।। वायुदृष्टांतो
सा ध्यनवैकल्यापत्तेश्च ।। यदिकिंचिद्रूपप्रागभाववद्भिघटव्यभिचारश्च ।। स
कलत्वविवक्षायामसिद्धेः ।। अतएवनद्वितीयः ।। नापितृतीयस्तृतएवेतिचेन्न ।।

रूपासमानाधिकरणरूपसंसर्गाभाववत्त्वेसतिद्रव्यत्वस्यवा ।। यावद्रूपसंसर्गाभाववत्त्वेसतिद्र
व्यत्वस्येहलक्षणेनविवक्षितत्वात् ।। अप्रयोजकत्वमाशंक्याह ।। नदेवहेति ।। बाधकांतरमाह ।।
अद्रव्यंहीति ।। ननुगुणाश्रयत्वाभावेअद्रव्यत्वंकुतइत्यत आह ।। गुणेति ।। प्रथमक्षणो
दृष्टापत्तिरूपपरिहारमाह ।। सत्समाह ।। परमसूक्ष्मग्रहणायोग्यः ।। ननुद्रव्यस्वपरिमाणा
धिकरणी ।। निर्गुणोत्पत्तेः स्वयमेवोक्तेनपरिमाणासंभवादितिचेन्न ।। पूर्वदृष्टत्वघ
टितकारणलक्षणापि प्रायेणोक्तदोषपूर्वनादिमप्रसंगाह ।। नहीति ।। द्वितीयबाध
कमिरस्यति ।। नचसंदिग्ना ।। ननुप्रथमक्षणोसमवायित्वमपिसमवेतजन्यकार्यानु
मानेलिंगमाह ।। योग्यतएवेति ।। योग्यताचगुणादौतुभावान्यधिकरणी ।। नद्रव्यताभावविशे
षणमित्यपि हृदयं ।। क्रमप्राप्तमसमवायीकारणंलक्ष्यति ।। समवायीति ।। विशे
ष्यमात्रंसमवायिकारणमित्याद्यसंविशेषणं ।। नंवुलादावतिव्याप्तिमितिविशेष्यभागः ।।
तदर्थश्चकारणमात्रंनतुनिश्चितकारणत्वं ।। तेनादावपिभ्रमरूपकारणत्वनिश्चयसंभ
वेनातिव्याप्तापत्तेः ।। नचनिश्चितपदंप्रमितिपरं ।। तस्यापिव्यर्थत्वात् ।। कारणत्वमात्रेऽ
तिव्याप्तसंभवात् ।। विशेषणार्थश्चमूलएवांगस्पष्टतिनात्रोक्तः ।। ननुज्ञानादीनांद्र
व्यादिन्नत्वं ।। स्वप्रत्यक्षंप्रतिचासमवायित्वंस्यात् ।। समवायिकारणप्रत्यासन्नत्वा

कारणत्वाच्च ॥ नच आत्मानित्वविशेषगु० नित्ये दोषः ॥ आत्ममनःसंयोगेऽव्याप्ते: ॥
नचात्मभिन्नवृत्तित्वविशेषगुणान्नाव्याप्तिरस्तीति युक्तं ॥ आत्ममनःसंयोगस्यात्म
भिन्नमनोवृत्तित्वात् ज्ञानादीनांचतद्भावादिति वाच्यं ॥ आत्मैकत्वेहि त्वासमवा
यीकारणेऽव्याप्तेः ॥ नह्यात्मापि आत्मभिन्नवृत्तिर्जातिमत्त्वाभावात् ॥ अतएवात्मभिन्नवृ
त्तीति विशेषणान्नाव्याप्तिरस्तीत्यपि अव्याप्तिपरास्तं ॥ आत्मैकत्वप्रसक्तेः ॥ आत्मैक
त्वं प्रति आत्मैकत्वस्यासमवायिकारणत्वापत्तेरिति ॥ अतएवात्मनःसंयोगाजन्यत्वेसतीति
विशेषणमितिपरास्तं ॥ सर्वस्यासमवायिकारणस्यादृष्टद्वारानजन्यत्वेनासंभ
वाच्चेतिचेन्न ॥ अदृष्टद्वारा आत्ममनःसंयोगाजन्यत्वेसतीतिविशेषणमित्यस्य
समवायिकारणप्रयासंनत्वे विषयतात्पर्यात् तत्रेपेक्षाकारणमसमवायिका
रणमितिविवक्षितत्वात् ॥ ननुतथापिपटंरूपंप्रतिपटस्यासमवायिकारणत्वंस्यात् ॥
नचसमवायिकारणप्रयासंयभावान्नतथा ॥ नंतुरूपवत् कार्योत्कर्षं प्रयो
जकत्वेविशेषणमितिचेन्न ॥ द्रव्यमिन्नत्वेसतीतिविशेषणादिति ॥ नन्वेवमपिने
श्वरलक्षणं ॥ नुरीतनुसंयोगेऽतिव्याप्तिः ॥ नह्यपिद्रव्यभिन्नत्वआत्मसंयोग
जन्यत्वंहिरूपत्वंतत्रिरूपेक्षाकारणात्वाच्चेतिचेन्न ॥ अत्रवदंति ॥ सोसमवा

यिकारणंभवत्येवेति ॥ तन्न ॥ नथासतितेन्नाशेद्रव्यनाशापत्तेः ॥ द्रव्यासमवा
नाशेद्रव्यनाशस्यभावात् ॥ अन्यतुखंडपटादौतद्भावान्नस्यकारणत्वमेवनी
लेतिनातिव्याप्तिरस्यात् ॥ नह्यपिन ॥ एवंतुविनाशादीनामपिकारणत्वंनस्या
द्विनाशंप्रतिकारणानांतुलयेवेति ॥ विनाशंप्रतिनत्वसमवायित्वप्रसंगादुक्त
एवेति ॥ केचित्तु ॥ यथाश्रुतमेवेत्तल्लक्षणं ॥ समवायिकारणप्रयासंनत्वेन
चकारणत्वेमिहविवक्षितं ॥ तुरीतंतुसंयोगादीनांतुनेतेनकारणत्वेजनकता ॥
किंतुतुरीतंतुसंयोगेनेति ॥ नह्यपि प्रौढिमात्रं ॥ नंतुसंयोगादीनामपितंतु
संयोगद्वारेनैवजनकतयासंभवापत्तेः ॥ नचभावकार्ये नाचभिन्नकार्यता
निरूपितकारणतासमवायिकारणनिष्ठानुगतधर्मानिरूप्यासचानुगतोधर्मउक्त
एव ॥ अन्यथासंभवादिति ॥ तेननरूपेपाकारणतावश्यकीतिवाच्यं ॥ नस्यतंतुत्वादा
वतिप्रसक्तेनसमवायिकारणनिष्ठकारणतानवच्छेदकत्वात् ॥ कारणत्वभागप्रवेशेच
आत्माश्रयापत्तेः ॥ किंचतेषांनेनरूपेणकारणत्वंतंत्वादीनामकारणत्वप्रसंगः ॥ ने
षांहिकारणत्वेविनिगमनाविरहएवबीजं ॥ नचानेनरूपेणकारणत्वेविनिगम

वाच्यं ॥

नाविरहः संभवति॥ एवंसति एतन्मतंसमर्थयतांगुरुचरणानांभावनाकलयामः॥ यत्तु समवाइकारणप्रत्यासन्नपदेनतन्मात्रप्रत्यासन्नत्वंविवक्षितमिति॥ तन्तुरीतंतुसंयोगादावतिव्याप्तिरिति॥ नच्च॥ आत्ममनः संयोगादावतिव्याप्तिरिति॥ कालपिंडसंयोगेअग्निसंयोगजेचाव्याप्तेः॥ यत्तु कार्यध्वंसप्रयोजकध्वंसाप्रतियोगित्वकारणावच्छेदकीविशेषणान्नातिव्याप्तिरितिमतं॥ तदपिन॥ कपालाकाशसंयोगनाशेचोर्ध्वसमनासिकारणेऽतिव्याप्तेः॥ तस्मात्कार्यादिरूपकार्यध्वंसप्रयोजकध्वंसाप्रतियोगिद्रव्यकारणेकपालेवृत्तेः॥ आत्मनोपिद्रव्यकारणत्वादात्ममनःसंयोगेऽव्याप्तिश्चेति॥ अतएवद्रव्यकारणासंयोगभिन्नत्वेसतीति विशेषणान्नातिव्याप्तिरितिमतंपरास्तं॥ पटतुरीसंयोगासमवाइभितुरीतंतुसंयोगेव्याप्तापत्तेरिति॥ एतेनस्वकार्यद्रव्यासमवाइकारणाभिन्नरूपवद्रूपसमवेतत्वंविशेषणं॥ नातिप्रसंगइतिपरास्तं॥ प्रेर्यकाशसंयोगादौअव्याप्तिरितिपूर्वपक्षसंक्षेपः॥ अत्रक्रमः॥ स्वकार्यद्रव्यानधिकरणावच्छिन्नत्वेसति अदृष्टद्वारात्ममनःसंयोगजन्यत्वेसति समवाइकारणप्रत्यासन्नंविषयतावच्छेदकरूपेणकारणमसमवाइकारणं॥ अत्रकारणमसमवाइकारणेयुक्तेआत्मैकत्वेस्वप्रत्यक्षंप्रतिअसमवाइत्वंस्यात्तदर्थंविषयतासम्

बंधिरूपेणेति॥ तावत्तन्तौसमवायिकारणेगतं॥ अतःसमवायिकारणप्रत्यासन्नमिति॥ तावत्तन्तौचज्ञानादेर्गतं॥ अदृष्टद्वारात्मममनःसंयोगाजन्यत्वेसतीति॥ तावत्तन्तौचेष्टागतं॥ अतःद्रव्यमिति॥ तावत्तन्तौचतुरीतंतुसंयोगेगतं॥ अतःस्वकार्यद्रव्यानधिकरणावच्छित्तिभिन्नत्वेसतीति॥ नचात्ममनःसंयोगादौस्वकार्यद्रव्याप्तिसिध्या व्याप्तिरितिवाच्यं॥ स्वकार्यद्रव्यानधिकरणावच्छेदकंतुरीतंतुसंयोगादयः॥ सिद्धास्तदन्यत्वस्यतत्रापिसत्त्वान्नच॥ नहितुरीपटसंयोगासमवायितुरीतंतुसंयोगेऽतिव्याप्तिः॥ तस्यैवतद्धिनाशेनाशाभावाधिकरणेवाच्यं॥ नहियएवतुरीतंतुसंयोगःपटारंभकस्तस्यैवपटतुरीसंयोगेनाशेतु॥ किंत्वन्यएवतत्रचविशिष्टभेदास्यैवेति॥ एवंसतिद्रव्यकारणेसादिक्षणमपिसमीचीनमेवेति॥ समवायिकारणसमानकालीनद्रव्यनाशप्रयोजकनाशप्रतियोगितावच्छेदकरूपसमवायिकारणत्वभिन्नरूपवत्त्वंविशेषणं॥ तादृशंचरूपंयद्यपिअसमवायिकारणत्वमेव॥ तथापितेनरूपेणाप्रवेशान्नातिप्रसंगइतिसंक्षेपः॥ ननुपटरूपसमवायिकारणंयत्तदप्रत्यासन्नंतन्तुरूपंकथंतदसमवायिकारणभिन्नंस्यादिति॥ नन्विति॥ समवायिकारणप्रत्यासत्तिस्तत्संबंधश्चकचित्समवायिकारणेसमवायःकचित्समवायिकारणेनसहसमवायः॥ उभयोश्चसमवायिकारणप्रत्यासत्तीत्वेनान्

न १२ अत्रप्रकृतकार्यसमवाइकारणाभिन्नत्वंवा॥ ५ भट्टीय

गमइतिनानुगमोगौरित्यादावनपरिहारेति॥ मैवमित्यादिना॥ यन्नसमवायिकारणमिति ५
यत्किंचित्कार्यसमवायिकारणभिन्नत्वंवा॥ नाधः॥ ध्वंसनिमित्तेऽव्याप्तेः॥ नत्रप्रकृतक
र्यंस्याध्वंसस्यसमवायिकारणाप्रसिध्यतिद्रुमत्वस्यवृक्षसमवायित्वात्॥ नद्वितीयः॥ घटा
दिनिमित्तदंडादावव्याप्तेः॥ तस्यरूपादिसमवायिकारणत्वेनयत्किंचित्समवायिकारणाभि
न्नत्वादिति चेन्न॥ अत्राहुः॥ मुख्यप्रागभावरूपस्यैवनिमित्तस्यैवात्रलक्ष्यतेनद्वितीयप
क्षस्येवाभिमतत्वादिति॥ तेन्न॥ सामान्यलक्षणानुयोगमकीभावप्रसंगादिति॥ अतएवभा
वनिमित्तस्यैवात्रलक्षणमंगीकृत्यप्रथमपक्षाश्रयणंपरास्ती॥ अन्येनुप्रकृतकार्यनिष्ठ
प्रतियोग्यनुयोगिभावसंबंधाश्रयसमवाइकारणाभिन्नत्वेसतितदसमवाइकारणा
भिन्नत्वेसतिप्रकृतकार्यकारणतावच्छेदकसामानाधिकरण्यंलक्षणमिति॥ तदप्यसत॥ घटध्वंसनि
मित्तकपालेऽव्याप्तेरिति॥ अत्रक्रमः॥ अयेसाबुद्धिनाराजन्यकार्यनाशजनकत्वात्
प्रतियोगिभिन्नत्वेसतिकारणंनिमित्तकारणमिति॥ तेहायस्यस्यभिन्नकार्यसमवाइत्वा य
भावोऽसमवाइत्वाभावःकारणंतच्चनतस्मिन्कार्येनिमित्तकारणं॥ अस्तिचध्वंस
निमित्ते॥ नस्यापिध्वंसेकार्येसमवाइत्वाभावात्॥ असमवाइत्वाभावात्कारणत्वा
च्च॥ नचतत्रध्वंसेकार्येसमवाइत्वप्रसिध्यार्थंतदभावतत्रनिवाच्यं॥ एवं
हिवायौघटस्यरूपंनास्तीत्यपिप्रतीतिर्नस्यात्॥ वायौघटरूपाप्रसिध्येः॥ य राम
॥२१॥

दिवायुमात्रस्यप्रसिध्यौघटरूपस्यचप्रसिध्यैवायौघटस्यरूपंनास्तीतिप्रतीतौ नवाधकी॥ तद
ध्वंसस्यप्रसिध्यैमुद्गरादेःसमवाइकारणत्वस्यचप्रसिध्यैध्वंसेमुद्गरादिर्नासमवाइत्वं
नास्तीतिप्रतीतौनवाधकमितिचेत्॥ नन्वेतद्राजनिर्द्रव्यमात्रमितिचवत॥ नन्वसमवाइकार
णत्वासमवाइकारणत्वयोर्लक्षणीलक्ष्येध्वंसएवैकथंवाजनीयइत्यतआह॥ तदेतदि
तिचेत॥ तस्येति॥ तत्रापिहेतुमाह॥ समवायस्येति॥ नन्वेतद्राजनिर्द्रव्यमात्रमितिचवत॥
ध्वंसस्यसमवायेसमवाइकारणत्ववाच्येघटध्वंसस्यकपालमेवसमवाइकारणमि
तिवाच्यं॥ नथाचकपालनाशेध्वंसोपिनस्येत्॥ समवाइकारणनाशेकार्यनाशस्या
वश्यकत्वात्॥ नचैषापत्तेः॥ ध्वंसनाशेतन्निमित्तकःप्रतियोग्यात्माका॥ नाथः॥ अ
नवस्थास्यात्॥ नद्वितीयः॥ प्रतियोग्युन्मज्जनापत्तेः॥ नन्वेवंध्वंसेजन्यत्वमपिन
स्यात्॥ तज्जन्यत्वेतेनाथः॥ स्यादिसापादनसंभवात्॥ भावत्वेनापिव्याप्तिसंकोचे
प्रकृतेपिसमानमितिचेन्न॥ इदानीमिदंविनसंमितिप्रतीतिमितिविरोधात्॥ नच
नत्रापिव्यंजकमपेक्षितंनासमर्थमितिवाच्यं॥ घटादावपिथात्वापत्तेः॥ तथाचोसाद
प्रतीत्याध्वंसस्यौत्सादेप्रामाणिकेयज्जन्यंतद्विनाशीतिव्याप्तौभावत्वेनसंकोचः॥
प्रामाणिकस्तुसोत्रप्रामाणिकइतियुक्तमुत्पश्यामः॥ इतिकारणनिरूपणं

करणलक्षणीकरणलक्षणेनप्रमाणलक्षणमुपसंहरति ॥ तदित्यादिना ॥ प्रमाणमिति
तेन ॥ यदितिदि ॥ अत्रानधिगतार्थं विषयकंयथार्थज्ञानंप्रमा ॥ तत्करणं चप्रमाणमि
ति ॥ उभयोरपिलक्षणंविवक्षितं ॥ तेननाग्निमत्यर्थविरोध ॥ ननुकथमेतल्लक्षणं ॥
एकपुरुषस्यघट ज्ञानानंतरमपरपुरुषस्यघट ज्ञानेऽव्याप्तेः ॥ नचस्वस्मानाधि
करणाधिगतविषयार्थ विषयकयथार्थज्ञानत्वंप्रमात्वं ॥ संशयोनरप्रमाचामव्या
सः ॥ नचअधिगतिपदंनिश्चयपरं ॥ घटोयमितिसविकल्पकेऽव्याप्तेः ॥ नस्वस्व
मानाधिकरणनिश्चयविषयघटत्वादिविषयकेतेनपूर्वोक्तलक्षणाप्रसादात् ॥ नच
मयाग्निर्विकल्पकंनांगीक्रियतइतिवाच्यं ॥ प्रमेयमितिज्ञाते ज्ञानानंतरंजाते घ
टोयमितिज्ञानेऽव्याप्तेरितिचेन्न ॥ स्वप्रकारप्रकारकस्वमानाधिकरणनिश्च
याविषयार्थ विषयकयथार्थ ज्ञानंप्रमेतिविवक्षितत्वादिति ॥ अव्याप्यादूषयति
तंनेति ॥ लक्षणविरहंदर्शयति ॥ गृहीतग्राहिणामिति ॥ अत्रप्रकृतार्थो विवक्षि
तः ॥ तथाचगृहीतविषयणामित्यर्थः ॥ अप्रामाण्येति ॥ अप्रमात्वादित्यर्थः ॥ तेन
तल्लक्षणेऽप्रामाण्यस्यादितिलक्षणांभपिनेत्यर्थः ॥ नचेष्टापत्तिः ॥ धारावाहिक

ज्ञानानांप्रमात्वस्ययुक्तिसिध्यत्वात् ॥ तथाहि ॥ द्वितीयज्ञानस्यकुतोनप्रामाण्यं ॥ गृहीत
ग्राहिकत्वादितिचेन्न ॥ गृह्यमा ॥ विषयत्वेनपूर्वत्वस्येवतत्वापत्तेः ॥ प्रथमान्यूनानति
रिक्तविषयत्वेनोत्तरस्याप्रामाण्यमित्यपिन ॥ पूर्ववदुक्तत्वात् ॥ नचप्रथमजन्यत्वेन
द्वितीयस्यतथात्वं ॥ द्वितीयजनकत्वेनप्रथमस्येवतथात्वापत्तेरिति ॥ नचपूर्वज्ञान
जन्यज्ञातताया उत्तरज्ञानविषयकत्वादधिगतार्थंगंतृत्वमितिवाच्यं ॥ तस्यत
द्विषयत्वेमानाभावान्निरुक्तिरिष्यमाणत्वाच्च ॥ नचवैजात्यप्रमाणेमानधिगतार्थ
गंतृत्वं विवक्षितं ॥ नचधारावाहिकस्थलेऽव्याप्तिरितिवाच्यं ॥ अनुभितेनतरोस्त
प्रसक्तेऽव्याप्तिप्रसंगादितिदिक् ॥ ननुप्रथमज्ञानेनसासत्तिक्षणविशिष्टे
घेऽनुमीयते ॥ एवंद्वितीयज्ञानोपीति ॥ अनधिगतार्थगंतृत्वंधारावाहिकस्थले
पीतत्वेनेतिस्वीकृतं ॥ नचेति ॥ क्षणासत्तीन्द्रियेणनप्रसक्षेणभानमितिपरह
रति ॥ प्रत्यक्षेति ॥ कालभेदः कालविशेषः क्षणइतियावत् ॥ नन्वत्रकिंनिय
मकमतमाह ॥ भेदग्रहेहीति ॥ कालभेदग्रहेहीत्यर्थः ॥ नचक्षणासत्तींद्रियेऽपि
उपनीतभानंस्यादेवेतिवाच्यं ॥ यत्रैवदेववशेनोपनयस्तत्रैवाव्याप्तिरस्तावदे

वस्थ॥मिसभिप्रायात्॥नचन्यायमतेपिप्रसक्षेइदंताया:कालघटिताया:भानानि
यमस्वीकारालक्ष्यमिदंतयाप्रमेतिवाच्यं॥एतस्योपलक्षणताया:कोसन्नरा
ईक्षाने ऽयातेः॥इष्यत्वादितिदिक्॥नस्यादिति॥क्रियाद्यधिकरणक्षणानांप्र
यक्षेत्वाग्रहेक्रियादीनामकक्षणकत्वाभिमानोनास्यादित्यर्थः॥तदेतस्येसनेनद्यो
तिर्धस्यकारणस्यमध्येयत्तानिरूप्यतेतत्करणमिसुक्तं॥तत्रप्रामात्रादिषुमध्ये
किंतत्रानिरूप्यमितिप्रच्छति॥नन्विति॥सत्यमिति॥नन्वेवमपसिद्धांतोग्रस्मि
तिचेन्न॥एकदेशमनेनोक्तमितिसेके॥इंद्रियसंयोगस्यादिरितिब्रुवतायाइंद्रियमे
वाक्षमितिसारः॥व्यापारविशिष्टस्यानिरूप्यत्वोपपत्तेइंद्रियसंयोगादिरि
सुक्तं॥नत्विंद्रियमिति॥नन्वतद्धियद्यपितत्प्रसंगः॥प्रमाणलक्षणेऽको
त्तरत्वादिति॥विशेषलक्षणेकंप्रमाणविभागमाह॥तानिचेति॥साक्षात्कारीति॥न
न्वत्रकरणार्थव्यापारवर्तंचेत्तदघटतेतिव्याप्तिः॥अविलंबेनकार्योत्पादकंचेत्तत्
सैभवः॥ईश्वरप्रत्यक्षेतिव्याप्तिश्च॥नचतस्यतदीयप्रमाकरणत्वाभावेपितत्
स्मदीयप्रमाकरणत्वान्नाव्याप्तिरितिवाच्यं॥घटादिव्यावृत्तस्यप्रमाकरणत्वस्यत

॥२३॥

त्राभावादिचेत्॥अत्राहुः॥नन्यसाक्षात्कारत्वावच्छिन्नकार्यनिरूपितकारणत
प्रयत्नेसतिव्यापारवत्वंसतिव्यर्थज्ञानकरणंप्रत्यक्षप्रमाणमितिवक्तव्यं॥तन्न॥व्या
पारवत्वेसतीत्यस्ययर्थंपदस्यचनेय्यर्थापत्तेः॥वस्तुतस्तु॥साक्षात्कार्यनुभवत्व
व्याप्तिजातिमत्त्वेनकारणंप्रत्यक्षप्रमाणमितिलक्षणार्थः॥नोक्तप्रत्यक्षस्यैवात्रलक्ष्य
मितिवक्तुंयुक्तंश्वरेऽव्याप्तेरितिचेत्॥यतिरिंद्रियत्वेनेंद्रियजन्यत्वंविवक्षितं॥तेनानुमि
त्यादेर्नाव्याप्तिः॥नचतेनरूपेणजनकतायांमानाभावः॥आवश्यकेश्यक्षुरादि
मित्रेवजनकत्वादितिवाच्यं॥यद्विरोषयोरित्यादिन्यायेनतथात्वव्यवस्थितेः॥नचबा
धकाभावेतथानियमः॥अत्रेंद्रियनिर्वर्त्यत्वेनमेवबाधकमितिवाच्यं॥तस्याग्रेनिर्वाच्य
त्वादत्रापिलौकिकप्रत्यक्षप्रमायाएवलक्ष्यत्वान्नभगवत्प्रत्यक्षप्रमायामव्याप्तिरितिध्येयं॥
एकदेशिमतमाह॥तस्याइति॥आत्मेति॥यद्यपिआत्मनःकिमुतान्तमनःसंयो
सेतिनतत्रयत्नमनर्थकः॥तथापिबाह्येंद्रियमनःसंयोगानुकूलक्रियया तंना
त्राह॥अन्यएवसंयोगःआत्ममनसोरस्तीतदर्थंइत्नमेतदुक्तमितिद्रष्टव्यं॥इं
द्रियमर्थंनेत्यत्रनियामकमाह॥इंद्रियाणामिति॥अनेनचार्थेनसामग्रीप्रदर्शनंप्र
संगादितिध्येयं॥निर्विकल्पकत्वंनजातिः॥अन्याप्यवस्तुतद्धिति॥उपाधिरूपमाह॥नामेति॥

इत्नि

नामादिवैशिष्ट्यानवगाहिनिर्विकल्पकमित्यर्थः॥ संयोगिनिर्विकल्पकपक्षेतत्राव्याप्तिवारणा
यनामादीति॥ तदभानेतुतन्मात्रमवलक्षणंबोध्यं॥ नन्विदमस्तभिलक्षणी॥ निर्विकल्पके
पिजातिमत्त्वंचैहिशिष्ट्यस्यापिभानात्॥ ननुतर्हिसविकल्पकनिर्विकल्पकयोःकोभेद
इतिचेत्॥ नात्वापिघटघटत्वइतिसमूहालंबनात्तस्यकोभेददृष्टानुयोगस्यसाम्यात्॥ ने
चसमूहालंबनेघटघटत्वयोर्विशेष्यत्वंभानं॥ निर्विकल्पकेचस्वरूपेणभेददृ
ष्टिवाच्यं॥ मभाप्यितुल्यत्वात्॥ नचनिर्विकल्पकेसंबंधाभावप्रमाणमेवनास्तीति
वाच्यं॥ घटत्वाभानेप्यितुल्यत्वात्॥ ननुविशेषणज्ञानानुरोधेननिर्विकल्पकघटत्वभा
सतइतिचेन्नव्यूढेभ्युपेये॥ जातिभानंचसंयुक्तसमवायेनवाच्यं॥ सचनघटसंयोगं
विना॥ तथाचघटभानसामग्र्याभावात्॥ घटेयंतत्रभासते॥ संबंधभानेतुकिंप्रमा
णमितिचेत्॥ नहिसविकल्पकेसंबंधोनभायात्॥ प्रमाणाभावात्॥ नचविशिष्ट
ज्ञानसामग्रीमहिम्नासंबंधोपिविशिष्टज्ञानेभासते॥ अन्यथासमूहालंबनविशि
ष्टज्ञानयोर्भेदानेस्यादितिवाच्यं॥ संबंधविषयकसमूहालंबनस्यापिसंभवेनस
बंधभानकृतभेदस्यवक्तुमशक्यत्वात्॥ तस्मात्समूहालंबनात्॥ विशिष्टज्ञानस्य
विशेषःकारणकृतःकार्यकृतःप्रकारतोवासंभवतीति॥ ननुतदनुरोधाद्धिविशिष्ट

ज्ञानेसंबंधभानं॥ यत्तुनिर्विकल्पकस्यसंबंधविषयिकलेघटत्वादिनांतत्रप्रकारत्वापत्तिः॥
भासमानेविशिष्यप्रतियोगिनएवप्रकारत्वादिति॥ तन्न॥ नहिभानंयद्विशिष्यतत्प्रतियो
गितत्प्रकारकं॥ अयंघटइतिज्ञानस्यघटत्वप्रकारकत्वेअत्रघटत्वमिसस्यापित्वा
पत्तेः॥ तस्माद्दासमानंयद्विशिष्यप्रतियोगितत्प्रकारकं॥ एवंचनिर्विकल्पकेसंब
धभानेपिनप्रतियोगितयाभानाद्घटत्वस्यप्रकारतापत्तिरिति॥ यत्तुसंबंधस्यनिर्वि
कल्पकवेद्यत्वेसविकल्पकेतस्यविशेषणतयाभानंस्यादिति॥ तन्न॥ घटेभासिचारादि
ति॥ अत्रक्रमः॥ संबंधसाक्षात्कारःसंबंधितावच्छेदकप्रकारकसंबंधिसाक्षात्का
रोहेतुरितिवादः॥ एवंचनिर्विकल्पकस्यसंबंधविषयत्वेनसंबंधितावच्छेदकप्रका
रकसंबंधिज्ञानजन्यतापत्तौसंबंधिमत्तत्रप्रकारतापत्तिर्विशेष्यतापत्तिर्वा॥ ड
नकीभूतजन्यज्ञानविषयस्यफलीभूतज्ञानेप्रकारताविशेष्यतान्यतरसंबंधस्यवा
त्व॥ अतएवाभावसंयोगादौनिर्विकल्पकंनेष्यतइति॥ ननुतथापिनिर्विकल्पक
नंतरंयत्रघटविशेष्यकंज्ञानंतत्रघटविशेषणमेवकुतोनभवतीति॥ विशेषणज्ञा
नस्यतुल्यतादितिचेन्न॥ अदृष्टस्यैवनच्छनियामकत्वमितिवृद्धैःपरिशीलित
पथात्॥ नन्वेतद्धिशिष्टबुद्धिगोचरेघटेभजनंनिर्विकल्पकेमानाभावादितिचेन्न॥

जागरा अविशिष्टानुभवः जन्यविशेषणज्ञानजन्यः जन्यविशिष्टज्ञानत्वात्॥ अनुमिति
दिकरणमनुमानस्यपक्षधर्मताबलसहायस्यनिर्विकल्पकसाधकस्यसत्वादितिदिक्। इति
नादिति॥ जिहासाजनकबुद्धित्वंहानित्वं॥ उपादित्साजनकबुद्धित्वंचोपादानत्वं॥ एतदु
भयभिन्नबुद्धित्वंचोपेक्षाबुद्धित्वं॥ नतृतीयाजातिः॥ सर्वेषुवर्णालोष्टविषयसमू
हालंबनेअव्याप्यवृत्तितापत्तेरिति भावः॥ नन्वेंद्रियादीनांत्रयाणामपिकारणात्तेषां
त्रयाणामपिप्रमाणतापत्तिः॥ नचैषापत्तिः॥ तथात्वेत्रयाणामनवकाशत्वेआगोना
मावधिप्रत्यक्षंसप्रतिपक्षमितिसिद्धांतश्चनिरुध्येत॥ प्रत्यक्षस्यापिज्ञानकरण
त्वेनानुमितिवत्परोक्षतापत्तिश्च॥ इत्याधुच्यापरेत्वित्यनेनोपेक्षमुख्यमतं आ
ह॥ अत्रेति॥ अत्रमध्यवर्त्तितामात्राभिप्रायेणसर्वेषामापाद्यत्वं॥ यद्विशेषणमेवतदेवक
रः॥ लौकिकप्रत्यासत्यंतरव्यवच्छेदकः॥ नतुप्रत्यासत्तिसामान्यव्यवच्छेदकः॥ ज्ञानादिप्र
त्यासत्तित्रयसत्वस्थितिभावः॥ घटविषयइति॥ नचदण्डावच्छेदनघटसंयोगेकथं
नघटग्रहइतिवाच्यं॥ तत्रघटस्यैवापमानात्॥ नचद्रव्यस्यअव्याप्यवृत्तितापत्तिः॥
इष्टत्वात्॥ स्थूलावयववावच्छेदनसंयोगस्यहेतुत्वाद्वा॥ अतएवसूक्ष्मावयववावच्छेदनसं
योगेपिनघटग्रहइति॥ नतुघटादिरूपस्यसंयोगसंनिकर्षोनावश्यकः॥

अन्याचक्षुर्विशेषणविशेषणता। अपराचसमवेतविशेषणता। अन्याचसमवेतविशेषणता॥

संयुक्तसमवायेनैवोपपत्तेरतआह॥ एवंमनसेति॥ नन्वघटनपादानसंयुक्तसमवाय
किंतुस्वाश्रयसंयोगएव॥ संयुक्तसमवेतसमवायेवाकुतस्तादृशंतत्राह॥ एवमिति॥ न
चस्वाश्रयसंयोगएवतत्रहेतुःनसंयुक्तसमवायइतिवाच्यं॥ सुखंमेद्रव्यंसंबुध्यं
साक्षात्कार्यत्वाघटत्वादिसानुमानात्॥ संयुक्तसमवायस्यप्रत्यासत्तित्वेसिद्धेति॥
ननुदूरस्थघटादिप्रमाणादिकंकुतोनगृह्यते॥ संनिकर्षसत्वादतआह॥ घटग
तेति॥ सत्यपीति॥ नचदूरस्थत्वाभावेनैवायंनिरस्तइतिवाच्यं॥ विनिगमकाभावेन
गुणदोषाभावयोरप्यसत्वात्॥ भावत्वेनलघुत्वाच्च॥ चतुष्टयसंनिकर्षमेवका
रणमितिभावः॥ नचैकएवहेतुरस्तु॥ किंचक्षुष्टयनतिवाच्यं॥ विनिगमकाभावादिति
भावः॥ तदुक्तमिति॥ विशेषणतानाचसंयुक्तविशेषणैक्यं॥ अपराचसंयुक्तसमवेतवि
शेषणतेति॥ अन्याचसंयुक्तसमवेतसमवेतविशेषणतेति॥ इतरेचविशेषणतासंयुक्त
संयुक्तसमवेतसमवेतसमवेतविशेषणतेत्यनेनान्याचसंयुक्तसमवेतसमवेतविशेषणता॥ अपराच
संयुक्तसमवेतसमवेतविशेषणविशेषणता॥ अन्याचसंयुक्तविशेषणविशेष
णता॥ अन्याचसमवेतविशेषणविशेषणता॥ अन्याचसमवेतसमवेतविशेषणविशेष
णता॥ अन्याचविशेषणविशेषणतायाअन्याचसमवेतविशेषणता॥ अन्याच
समवेतसमवेतविशेषणविशेषणवृत्तेचमणिकानेतारः॥ घटाभावग्रहे

घटत्वेनरसत्ताभावग्रहेरूपेतरसत्ताभावग्रहेरूपत्वादिभावग्रहेगकारेघत्वाभावग्रहे भूतलीयघटाभावग्रहेभूतलरूपवत्तिघटाभावेपटाभावग्रहेभूतलरूपगतरूपवत्तिघटाभावेपटाभावग्रहेरूपादिभावेपटाभावग्रहेरूपादिनिष्टघटाभावेयत्वाभावग्रहेरूपादित्वनिष्टपटाभावपटत्वाभावग्रहेसादिलुप्तयथायथंक्रमेणद्रष्टव्यइतिसंक्षेपः॥ एवमिति॥ समवायग्रहेविशेषणतोक्तमुदाहरणं॥ तथाहि॥ तंतुरूपपटसमवायग्रहे॥ संयुक्तविशेषणता॥ प्रथमा॥ द्वितीयाचतंतुरूपरूपत्वसमवायग्रहे॥ चतुर्थीयारूपादिसमवायग्रहे॥ चतुर्थीचरूपादित्वसमवायग्रहइति॥ नन्विति॥ निर्विकल्पकंभावतुप्रत्यक्षेभिसन्धयः॥ तंप्रहुः॥ परमार्थसदादिति॥ पारिमार्थिकमित्यर्थः॥ नचघटादेव्यभिचारः॥ ज्ञानत्वेनविशेषणात्॥ क्वचित्पारमार्थनिइतिपाठः॥ तत्रपरमार्थनिइतिपारमार्थकंसाक्षात्कारिभिरभिधानात्॥ केचित्तु॥ परमःअवाधितःअर्थोयस्यतदूपरमार्थी॥ अत्रभावप्रधानोनिर्देशइति॥ परमार्थस्यभावःपरमार्थत्वं॥ तस्मादिदमर्थइत्याहुः॥ वस्तुतस्तुपरमश्चासावर्थश्चेतिपरमार्थसूस्मादित्यर्थइत्याहुः॥ नचस्वरूपासिद्धिः॥ विषयनासंबंधेनपरमार्थस्यनिर्विकल्पकहेतुत्वात्॥ एवंकथालाघवेनअभिचारः॥ परमार्थिकत्वेऽबाधितत्वाहेतुमाह॥ खलक्षणविषयत्वादित्यर्थः॥ अत्रोभयत्रापिव्याप्तिसाधनेहेतुः॥ अन्वयेदृष्टांतासाधनात्॥ इतिसविकल्पकंतिति॥ सविकल्पकेकथंप्रत्यक्षंनकथमपीत्यर्थः॥ तत्रहेतुः॥ सामान्यविषयत्वादिति॥ एवंतत्रसविकल्पकंनप्रत्यक्षं॥ सामान्यविषयत्वात्॥ शाबलेयगवयसामान्यविषयत्वेहेतुमाह॥ अनुगताकाराकारवगाहित्वादिति॥ अनुगतव्यवहारसमर्थकत्वादित्यर्थः॥ यद्वाअनुगताकारःसामान्यमेवतदवगाहित्वात्तद्विषयत्वादित्यर्थः॥ नचसाध्याविशेषः॥ उपाधिनानुपहितभेदेनभेदादिति॥ सविकल्पकपक्षेलुप्तमानअप्रयोजकतामाशंक्याह॥ अर्थजन्यतेति॥ अर्थजन्यतंप्रत्यक्षत्वव्यापकं॥ सविकल्पकाद्यावृत्तमानंसव्याप्यप्रत्यक्षसमादायनिवृत्तइत्यर्थः॥ नचसविकल्पकव्यक्तिर्प्रसिद्धेवेति॥ अर्थजन्यंव्यापकंननतोव्यावर्त्तनइतिवाच्यं॥ अर्थजन्यमात्रजन्यत्वेनोक्तत्वात्॥ यत्तुअंशविवक्षायांसमाधानं॥ तंन्न॥ तेनसविकल्पकेकस्मिन्धर्मेप्रामाण्यानंगीकारात्॥ ननुजातिरप्यर्थएव॥ नचार्थमात्रजन्यते॥ नन्वेवंव्यावृत्तइत्याशंकायामाह॥ अर्थस्यचेति॥ ननुजातिरपियार्थीक्रियतआहु॥ स्वलक्षणंहीतिति॥ सामान्यस्यपारमार्थिकत्वेहेतुमाह॥ लघुत्वादिति॥ तथाचसामान्यंनपरमार्थसत्॥ लघुत्वात्॥ इत्यनुमानं॥ नचसाध्यसिद्धिः॥ यतिर्

क्षिप्यभावसाध्यकेतस्यअदोषत्वात्॥ तथानिरंकेणापिव्यभिग्रहात्साध्यविशेष्यकानु
मितिसंभवाच्च॥ अप्रामाण्यसाध्यकव्यतिरेकवत्॥ नन्वेवंकिमिदंदुष्टत्वमिष्या
रीक्यदूषणत्वाच्चेत्॥ प्रमाणेत्यादिना॥ तथाप्रमाणनिरूपितविधेयतावत्यन्यत्वाच्च
यत्समवेतत्वंतद्धितिभानः॥ तावताजातिविषयतासंविकल्पकेनप्रत्यक्षेमिसुर्क॥ त
न्न॥ निर्विकल्पकेपिजातिविषयत्वात्॥ अन्यथाधर्मिग्र्येनमानं॥ कुतःसत्रप्रकार द
चिंता॥ किंचलाघवेनार्थे जन्यत्वमवप्रयोक्षेप्रयोजकं॥ नन्वर्थमात्रजन्य
त्वं॥ तच्चसविकल्पकेपीतिदोषोसत्येव॥ दोषांतरमाह॥ सामान्यस्येति॥ व्यव
हारायः॥ अघटव्यावृत्तेघटानुगतव्यवहारःसमर्थनीयः॥ सचनस्वीयव
हारः॥ अघटस्यत्रघटव्यवहारः॥ तनैवनान्येतत्॥ आद्येअनवस्था॥ अंतेत्र
श्रमतः॥ एवंवस्तुविस्तरस्तुसामान्यनिरूपणेनिवदद्रष्यतीति॥ ॥छ॥
॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ तदेवंव्याख्यातंप्रत्यक्षं॥ ॥छ॥ ॥छ॥ ॥छ॥
श्रीहयग्रीवार्पणमस्तु॥ रामचंद्रार्पणमस्तु॥ राघवेंद्रार्पणमस्तु॥ ॥छ॥
इदंपुस्तकंव्यासरायेनलिखितं॥ मुरारिमट्टीयंतुलक्षेप्रत्यक्षपरिच्छेदःसमाप्तः॥ हयवदनायनमः॥ राम
॥२८॥

श्रीहयवदनायनमः॥ हरिः ॐ॥ अथानुमानंनिरूप्यते॥ व्याप्तिज्ञानंकरणं॥ परामर्शोव्यापारः॥ अ
नुमितिःफलमितिवृद्धाः॥ मनःकरणं॥ परामर्शोद्वारं॥ अनुमितिःफलमितिकेचित्॥ लिंगकर
णं॥ परामर्शोद्वारं॥ अनुमितिःफलमितिअन्ये॥ निर्व्यापारःपरामर्शएवकरणं॥ अनुमितिःफलमि
त्यपरे॥ तत्रएकदेशिनामयंरीतिमभिप्रेत्यानुमानलक्षणमाह॥ लिंगेति॥ व्याप्तिचारज्ञानि
रोधिनिश्चयविषयकपक्षधर्मताज्ञानमनुमानमित्यर्थः॥ नत्वयमेवसिध्यतीतिनिश्चयोविधे
यः॥ तथाहि॥ परामर्शेकिंकरणत्वं॥ नतावद्व्यापारवत्त्वंतदनुपगमात्॥ नचसंस्कारत्वप
व्यापारोभ्युपगमेकोदोषइतिवाच्यं॥ संस्कारजन्यत्वेनानुमितेःस्मृतित्वापत्तिः॥ नापिज्ञानो
द्वारं॥ व्याप्तिग्रहकस्यविषयपरिशेषकस्यवातज्जन्यत्वमानाभावात्॥ तर्कस्यत्रंकान्निवर्त्तक
त्वेनैवोपयोगेशंकाविरहेतदनवतारात्॥ नचपरामर्शांतरमेवद्वारमितिवाच्यं॥ एकपरा
मर्शानंतरंनियमेनयावत्परामर्शोत्पत्तौमानाभावात्॥ नचपरामर्शस्यव्यापाराभावेपिअविल
बेनकार्योत्पादकलेवरकरणात्तमितिवाच्यं॥ असिद्धेः॥ नहिपरामर्शस्यविलंबेनानुमिति
जनकत्वंतएवेतिनियमः॥ बाधादिप्रतिबंधकावतारेसतिपरामर्शेअनुमितिनुदयात्॥
कारणांतरसमवधानेपरामर्शेसतिअवश्यमनुमितिरितिचेन्न॥ कारणमात्रस्यकारणत्वा
नेः॥ नचानुमितिलाघवेछेदनकारणत्वमेवकरणत्वं॥ परामर्शस्येतिवाच्यं॥ पक्षादीनामपित

त्वापत्तेः॥ नचपक्षादीनांकारणत्वमस्त्येव॥अनुमानत्वेनास्ति॥परामर्शस्यैवात्रानुमानलक्षणत्वा
दितिवाच्यं॥सकलतांत्रिकव्यवहारविरोधप्रसंगात्॥व्यवहारानुरोधेनहिलक्षणा॥नतुल
क्षणानुरोधेनव्यवहारः॥सकलपरिभाषोच्छेदापत्तेः॥तस्मान्नपरामर्शेः करणं॥नापिलिंगं क
रणं॥अतीतादौव्यभिचारात्॥नापिमनःकरणं॥अनुमितेर्मनिसत्वापत्तिः॥कारणांतरासह
कृतमनोजन्यत्वस्यैवतत्प्रयोजकत्वात्॥नस्माद्व्याप्तिज्ञानंकरणं परामर्शोद्वारमित्येवंग्रंथ
नमपित्रिरूपलिंगनिष्ठव्यभिचारभावसहचारंचमहानसीयधूमादावनुभूयपर्वतंगतस्य
सः तदीयधूमदर्शनानंतरंव्यभिचारभावसहचारस्मरणोद्बुद्धव्याप्तिज्ञानवान्वह्निमान्धू
मवानयमिति परामर्शानंतरं यत्रवह्न्यनुमितिः तत्रकथंव्याप्तिज्ञानंकरणं॥परामर्शस्यैवतस्यामावात्॥इतिचेन्न॥व्यभिचारज्ञानविरोधिज्ञानस्यव्याप्तिरूपार्थेनविव
क्षितत्वात्॥तत्रचनादृष्टव्यभिचारज्ञानंसहकारि॥नचेदृशंपरामर्शस्यकुतोऽपिसंभवः॥
दर्शितिवाच्यं॥पदार्थस्यनिरूपस्यैवसत्वात्॥नचनादृष्टज्ञानस्यपरामर्शएवान्यैसिद्धो
कारणत्वमेवनास्ति॥कारणत्वेहरतोपास्ति॥नचविशेषणज्ञानस्यलिंगेरिष्टेवैशिष्ट्यावग
हिज्ञानइतिवाच्यं॥अनुमितौकरणांतरानुपपत्तावस्यैवकारणत्वात्करणत्वाच्च॥न
चमनएवकरणं॥नस्यनिरस्तत्वादिति॥परामर्शस्यकारणतानामनंगीकुर्वतोमीमांसक

स्यनिरासंहृदिनिधायपरामर्शेनुमानमित्येसंग्रंथकारः॥तेनिरासप्रकारश्चएतच्चावश्यमभ्युपेयमि
तिपक्षिकाव्याख्यानावसेयंस्यादितिसंक्षेपः॥विशेषणेउक्षणमितिदिक्॥तच्चेति॥आगमा
नुमानेति॥
ननुप्रत्यक्षेऽतिप्रसंगइतिचेन्न॥एतस्योपलक्षणत्वेनव्याप्तिविषयकयथार्थधर्मताज्ञानत्वेनतज्ज
न्यत्वस्यानुमितित्वजातेर्वा अनुमितिलक्षणत्वादिति॥ननुव्याप्तिज्ञानत्वेनत्यस्यकोऽर्थः॥व्याप्तिसह
कारित्वेनवा॥व्याप्याधारत्वेनवा॥नद्वितीयः॥अर्थविशेषणत्वादिति॥नाद्यः॥व्याप्तिसहकारित्वे
नव्याप्तिरूपार्थकोगमकेप्रत्यक्षेतिव्याप्तेः॥ननचनदृष्टिकस्यचिल्लिंगमितिवाच्यं॥एकैकंसर्वविशे
षणवैयर्थ्यापत्तेः॥नचव्याप्तिसहकारेणाव्याप्तिरिक्तोऽर्थोगमकोलिंगमितिविवक्षितमि
तिवाच्यं॥पुरुषत्वनिरूपितकरणत्वादिनाऽपिव्याप्तिसहकारेणव्याप्तिरिक्तपुरुषत्वरूपार्थगा
मकेप्रत्यक्षेतिव्याप्तिस्तादवस्थ्यात्॥नचनत्रव्याप्तिज्ञानंसहकारिनव्याप्तिरितिवाच्यं॥
तथापिनथात्वेनासौभवापत्तेः॥अतएवव्याप्तिज्ञानसहकारेणव्याप्तिरूपार्थगमकेऽ
र्थगमकेलिंगमितिपरास्तं॥पुरुषत्वगमकेप्रत्यक्षेतिव्याप्तेः॥व्याप्तिज्ञानसहकारेणव्या
प्तिज्ञानरूपार्थगमकेप्रत्यक्षेतिव्याप्तेश्च॥ननुव्याप्तिज्ञानत्वेनसहकारिनाविवेक्षिता॥
तत्रचभ्रमनिरासंधर्मिग्रहेणविषयत्वेनचसहकारितेतिचेन्न॥अस्त्येवंतथथानथा॥
अर्थगमकत्वेनार्थप्रतीतिजनकत्वं॥अतीतादौव्यभिचारेणासंभवापत्तेः॥नाप्यर्थप्रतीतिज

नकज्ञानविषयत्वं । पक्षादावति व्याप्तिरिति । अत्रवदंति ॥ अर्थगमकेयस्मा
त्प्रतीतिर्जनकपक्षधर्मताप्रमाविषयत्वं । व्याप्तिबलेनेत्यस्यव्याप्याधारत्वेनेत्यर्थः ॥ तथाच व्या
प्याधारत्वेनार्थप्रत्ययजनकपक्षधर्मताप्रमाविषयत्वं लिंगत्वमितिलक्षणोपर्यवस्यति ॥
अत्रविशेष्यदत्तपक्षकधूमानुमाने अतिव्याप्तिवारणाय ॥ नचैवंकृतलिंगस्यपरामर्शा
नुमानंनस्यादितिवाच्यं ॥ तत्रलिंगपदस्यभावप्रधानत्वादिति ॥ तद्दृष्टलिंगत्वतद्ग्राही
चपरामर्शानुमानमित्युपर्यवसानेअसंभवदुपेक्षणीयं ॥ नहिवह्निव्याप्यधूमवानय
मितिपरामर्शकृत्यानुमानंव्याप्याधारत्वेनार्थप्रतीतिर्जनकपक्षधर्मताप्रमाविष
यत्वरूपलिंगत्वाग्राहीति ॥ वस्तुतस्तुव्याप्तिविशिष्टपक्षधर्मत्वमेवलिंगत्वं ॥ तत्रसं
यत्रेति ॥ अत्रसंशयपूर्वपक्षसंशयव्याप्तिस्वरूपंविचार्यते ॥ ननुकोव्याप्तिः ॥ अत्रभिचरित
सहचारएवेति चेन्न ॥ कोयमत्रभिचारः ॥ केवलान्वयिव्यभिचारः ॥ तत्रापिसाध्याभावा
धिकरणे धर्मिण्यभावः ॥ नचतत्रापिव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकसाध्याभावेन
तादृशभावसिद्धेः ॥ सिद्धावेवानुमानात् ॥ नाद्य
रूपसाध्याभाववतिवृत्तेः प्रमेयत्वस्यसत्वात् ॥ स्वसमानाधिकरणसाध्याभावप्रतियोगिसाध्य
समानाधिकरण्यमेवव्याप्तिरितिचेन्न ॥ दृष्टसंयोगिद्रव्यत्वादित्यत्राव्याप्तेः ॥ प्रतियोग्यसमा

नाधिकरणइति । अस्तीभावस्यविशेषणमितिनवाच्यं । धूमानुमानेअव्याप्तेः ॥ नचपर्वतीयत्वं
किंसाध्यं ॥ तथाचप्रतियोग्यसमानाधिकरणः धूमसमानाधिकरणः पर्वतीयवह्निरसाध्या
भावोमहानसादौनप्रतियोगिपर्वतीयवह्निरूपसाध्यसामानाधिकरण्यं धूमस्येति ॥ नाप
स्वाभाविकसंबंधोव्याप्तिः ॥ किमिदंस्वाभाविकत्वं । औपाधिकान्यत्वमितिचेन्न ॥ यद्वि
शिष्यवा
शिष्यवा ॥ एकतोव्यधिकरणत्वं वा ॥ नाद्यः ॥ व्यभिचारिण्यतिव्याप्तिः ॥ नाद्यः ॥ सिध्यसि
द्धिभ्यांव्याकृतमितिचेन्न ॥ उच्यते ॥ प्रतियोग्यसमानाधिकरणाद्धूमसमानाधिकरणाद्यो
नाभावःप्रतियोगितावच्छेदकानवच्छिन्नसाध्यसामानाधिकरण्यंव्याप्तिरिति ॥ नस्यादिति ॥ उ
त्पत्तीयत्वंनविवक्षितं । हेतुनिष्ठव्यभिचारज्ञानविरोधिव्याप्तिविषयकपक्षधर्मताज्ञा
नंचविवक्षितं ॥ एतेनलिंगज्ञानस्यपरामर्शत्वेधूमइतिज्ञानस्यापिपरामर्शत्वापत्तिः ॥
नापिव्याप्तिविशिष्टपक्षधर्मताज्ञानंपरामर्शः ॥ नोद्देश्यत्वंबुद्धिज्ञाने अतिव्याप्तेरित्यादिदूष
णमनुचकारेत्यभिप्रेत्योक्तं ॥ प्रथमदर्शनंव्याप्तिविषयकं अनुमितेरग्रिमदर्शनमिति ॥ भूयो
भूयोदर्शनं ॥ स्वाभाविकसंबंधंअव्यभिचरितसंबंधं ॥ भूयोदर्शनंव्याप्तिग्रहकं ॥ व्यभि
चारादिशंकते ॥ यद्यपीति ॥ व्याप्तिरूपविषयाभावानव्याप्तिप्रत्यक्षत्वमिस्याद्येनसमा
धत्ते ॥ तथापीति ॥ नस्वाभाविकसंबंधः नाव्यभिचरितसंबंधः ॥ औपाधिकःसव्यभि
चारः व्यभिचारप्रमाणदर्शनियारीसाभिधानमितिभावः ॥ ननुभूयोदर्शनशब्देन

भूयसुस्कोनेषुसाध्यसाधनंउच्यते।। उतभूयसांसाध्यसाधनानांदर्शनं।।अथवाभूयां
सिसाध्यसाध्यनूनि।। नांधः।।अयमेनद्भिन्नः एतल्लिंगादेतद्भावान्।। नहितीयः।।द्रव्य
त्वपृथिवीत्वयोर्व्याप्तिग्रहनद्भावान्।। नतृतीयः।। एकत्रधारवाहिकज्ञानेव्याप्तिग्रहप्रसं
गात्।। क्वचिदेकज्ञानेपिव्याप्तिग्रहापत्तेश्चेतिचेन्न।। भूयोदर्शनंहिनसाध्यसाधन
सहचारज्ञानमेवविवक्षितं।। तस्यव्यभिचारज्ञानविरोधिसहचारज्ञानत्वेनैवकारणा
ता।। अतोनानुगमः।। नचैवंसकृद्दर्शनेसतिव्याप्तिग्रहप्रसंगादितिवाच्यं।। व्यभिचारज्ञा
नाधभावेकृष्णत्वाद्।। भूयस्त्वंव्यभिचारान्तुक्वचित्कारणंपिप्रायेण।। नन्वेवंसहचारज्ञा
नस्यव्याप्तिज्ञानकारणत्वमानाभावः।। व्यभिचारज्ञानाभावेनोपपत्तिरितिचेन्न।। अत्रो
च्यः।। व्याप्तिप्रत्यक्षंहिसंबंधप्रत्यक्षं।। तत्रसंबंधिप्रत्यक्षंकारणमेवेतिसहचारज्ञानकारणा
मिति।। तन्न।। एवमपिपूर्वोक्तरूपेणाकारणत्वासमर्थनात्।। संबंधिप्रत्यक्षतत्रैवकारणताऽ
भ्युपगमात्।। केचित्तु।। असहचारज्ञानंप्रतिबंधकंव्याप्तिज्ञानेइत्यविवादं।। नथाचासहचारज्ञाना
दप्यनुमितेसहचारज्ञानभवव्याप्तिप्रत्यक्षेजनकमिति।। तदपिमंदं।। एवंघटज्ञाने
घटज्ञानस्यजनकतायत्तः।। अन्यत्रविनष्टेहेतौभवतिकदाचिदपिभ्रमः।। तत्रेजन्यता
वश्यमभ्युपेया।। सचसहचारभ्रमयेवा।। तथाचएकत्रव्याप्तिप्रत्यक्षेसहचारज्ञानस्यका

दोष

रणाहेसिद्धेव्याप्तिप्रत्यक्षसामान्येहेतुत्वभावश्यकंयद्विषयेपिसद्दिन्यायदिसाहुः।। इतिसंक्षेप।।
रणमहइति।। नरस्यामत्वेसत्यर्थः।। ननुतस्यप्रयोजकत्वेकिमायातमतआह।। प्रयोजकश्चेति।। न
लुधर्मेसुव्याप्तिसत्वविषयाभावान्नकथंचिद्भूयोदर्शनेनव्याप्तिग्रहइत्यंशेनोपाधिरिसा
ह।। नचेसद्दिना।। अयोग्यस्येति।। अनुमानमात्रोच्छेदापत्तेरितिभावः।। नन्वनुपलभ्यमा
नस्तुउपाधिःस्यादेवेसतआह।। यत्रेति।। धर्म्याग्र्योःस्वाभाविकसंबंधमुपसंहरतीति।
नचेति।। अतएवनचेयद्दिनापीनरूक्तयमितिपरास्तं।। उपक्रमोपसंहाररूपलाद्ग्रंथयो
रिति।। ननुयोग्यानुपलब्ध्याउपाध्यभावेनिश्चीयतइतीयुक्तं।। तस्याःस्वतंत्रप्रमाणत्वा
भावात्।। अत्रनआह।। यथधर्मविष्यदिति।। प्रथमभागेननकेवलंसहकारिपदर्शनंद्वितीय
भागेनचानुपलब्धेःप्रसक्तंचमुख्यप्रमाणमितिभावः।। नन्वुपाध्यभावावधारणंकु
त्रोपयुक्तमित्यांक्यव्याप्तिग्रहोपयुक्तमिसाह।। उपाध्यभावावेति।। इदंचकेषांचिन्मतेना
अव्यभिचारदर्शनार्थंस्वमतेनेववा।। संस्कारपर्यंतधावनंकेवलोधिसंस्कारसहितउपाधेः
स्मृतिरूपापिनिश्चयोनास्तीतिप्रदर्शयतुंभूयोदर्शनसंस्कारत्वंवर्णितुंअनुकूलतर्का
वतारार्थमितिं।। प्रथमइति।। क्वचित्काभिप्रायेण।। एवमग्रेपि।। नन्वेतान्तृतीयेज्ञानपरा
मर्शइत्युक्तं।। नचतत्कारणंमानाभावात्।। आवश्यैकपक्षधर्मताज्ञानव्याप्तिस्मरणा
भ्यांएवानुमितिरूपसंघतइत्याशंक्याहं।। एतच्चेति।। कारणत्वेनेतिशेषः।। नचापक्षी

यसाध्यानुरोधेनतस्यकारणानेतिभावः॥पक्षधर्मता ज्ञानेनैवपक्षीयसाध्यसिद्धिस्यादतआ
ह॥अयमेवेति॥अयमभिप्रायः॥व्याप्तिस्मरणापक्षधर्मता ज्ञानाभ्यांयदीयसाध्यसिद्धि
रितितवानुमतौ॥तत्रपक्षधर्मता ज्ञानस्यनपक्षधर्मताज्ञानेवानुमितिजनकता॥धू
मोवह्नियाप्यइतिस्मरणेऽनन्तरं किंचिद्नुपलब्धेइतिपक्षधर्मता ज्ञानेचानुमिसा
पत्तेः॥तस्माद्व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेनकारणतापक्षधर्मताज्ञान
स्यवाच्या॥नत्वावच्छेदकभागस्यगुरुत्वेनपक्षधर्मताज्ञानमेवात्रपरामर्शइतिदिक्॥
केचित्तु नलुपक्षधर्मताज्ञानंनकारणमंतआह॥एतच्चेति॥पक्षधर्मताज्ञानमित्यर्थः॥
योजयंति॥अनुमितिकरणात्मेवविशदयंति॥तस्मादिति॥संदेहाभावादिनेति॥ननु
साध्यसंदेहानानुमितिकरणात्॥तस्यपरामर्शादिना अनुमितिपूर्वसमयेविनाशा
त्॥निश्चितेपि सिसाधयीषयाऽनुमानाच्च॥अतएवमसंदेहघटितपक्षतापिका
रणमिति॥सकलकारणकलापसत्तिकथंनानुमितिरितिचेन्न॥साध्यसंदेहस्येवानुमि
तिबंधकतयानदभावरूपपक्षतात्विरहादिद्यावायात्॥एवंचसंदेहस्यनिश्चयाभा
वार्थः॥संदिग्धइति॥सिसाधयिषाविरहसहकृतानिर्णयविषयइत्यर्थः॥निर्णीतो

सिसाधयिषाविरहसहकृतानिर्णयविषयइत्यर्थः॥संदिग्धेस्यपर्वोक्तएवार्थोऽनुसंधेयः॥अ
ग्निसंदेहअग्निनिश्चयाभावइत्यर्थः॥संशयस्याग्निश्चयाभावस्यव्याप्तिस्मृतौजानाया
मिति॥नचैवमग्निस्मरणानंतरंकथंनानुमितिरितिवाच्यं॥परामर्शरूपकारणाभावादिति॥तस्या
कारणत्वेप्रागेवसमर्थितमितिभावः॥स्वप्रतिपत्तीति॥ननुयथाश्रुतमात्मादाकृतव्याप्ति
नचलिंगपदप्रवेशेनैवभिनेवाच्यं॥लिंगस्याहेतुत्वात्॥नचानुमानमितिपूरणीयं॥स्वपद
स्यऽत्वपरत्वेपरार्थानुमानेऽतिप्रसंगात्॥अन्यपरत्वेऽसंभवादितिचेन्न॥वाक्या
त्पक्षधर्मताज्ञानेस्वार्थानुमानमित्यत्रतात्पर्यात्॥नदेवदर्शयति॥नभाहीत्यादिना॥यहित्यादि
रूपेवाक्यप्रयुक्तमनुमानेपरार्थानुमित्यत्रतात्पर्यात्॥ननुवाक्यादेवश्रोताकथंनाग्निसं
देहेति॥अतआह॥नत्रेति॥साध्यमिसृष्टिवदतोभिप्रायः॥वक्तुरनाप्तत्वेननद्वाक्येनाना
प्तत्वनिश्चयात्॥नह्यनाप्तवाक्यात्प्रमेति॥नचपदार्थस्मरणादिरूपसकलकारणसंप
त्तौअनाप्तोक्तत्वनिश्चयस्यप्रतिबंधकत्वमानाभावादितिवाच्यं॥अनाप्तोक्तत्वनिश्चयेन
अयोग्यतानिश्चयेसकलकारणासंपत्तेरेवासिद्धेः॥ननुप्रथमंवह्निमानितिश्रुत्वायाव
न्नानाप्तोक्तत्वनिश्चयाजन्यायोग्यतानिश्चयस्तावदेवकथंनस्यादितिचेन्न॥वाक्या
वाक्यश्रवणाग्रेववाक्यार्थेनायोग्यतानिश्चयेनवाक्यश्रवणानंतरंअयोग्यताभि

वादिवचनेन

ता

भेव

श्रयात्प्रतिबंधकाभावस्यकार्यभूतस्येवहेतुत्वाच्चेतिदिक्॥हेतुश्चत्रिविधः॥अ
न्वयव्यतिरेकीकेवलव्यतिरेकीकेवलान्वयीचेत्युद्देशमनूद्यसामान्येनाधायअन्वय
व्यतिरेकिणंनिरूपयितुमारभते॥सचेति॥अन्वयव्यतिरेकिसहचारज्ञानज
न्यव्याप्तिग्रहविषयत्वंतल्लक्षणंबोध्यं॥ननुधूमेनव्यतिरेकव्याप्तिः॥धूमाभा
ववतिजयःपिंडेवह्निःसत्वात्॥अतआह॥व्यतिरेकव्याप्तेरिति॥तथाचधूमा
भावोनव्याप्यः॥किंतुवह्न्यभावएवातथात्वेनव्यभिचारइतिभावः॥न्यायस्येति॥
यथोगप्राथम्यांतत्रैवव्याप्तिरितिपरिच्छेदार्थः॥ननुधूमेयद्व्याप्तिग्रहस्तथा
कथायांऽन्वयंकथंनप्रदर्श्यतइत्यत्राह॥यत्रेति॥चरितार्थत्वादनंतर
युज्यतइतिशेषः॥ननुतर्हिव्यतिरेकव्याप्तिरेवप्रदर्शयितामतआह॥त
त्रापीति॥व्यतिरेकसहचारज्ञानमात्रजन्यव्याप्तिग्रहविषयत्वंतल्लक्षण
मभिधायतंविभजतेयति॥कश्चिदिति॥जीवदिति॥नचैसात्मक
त्वेऽसिद्धेः॥नापिप्राणादिमत्त्वेनचरितार्थत्वात्॥पक्षतावच्छेदकतेतरव्यापत्तेः॥

जीवदेह
राम
॥२१॥

दृनिवाच्यं॥प्राणाद्यधिकरणशरीरत्वस्यान्वयव्यभिचारदोषत्वाच्च॥ननुकेवलसात्मकत्वं॥ननावदात्माधा
रत्वं॥तस्याप्रसिद्धेः॥नचादृष्टाश्रयसंबंधेनात्माधारत्वंशरीरेसत्वेतिवाच्यं॥प्रमाणाभा
वात्॥नचेदंजीवदितिप्रत्यएवप्रमाणं॥तस्यप्राणादिमत्तयाचरितार्थत्वात्॥नचेदंसा
त्मकमितिप्रत्ययस्तथा॥तस्यतद्विषयत्वसिद्धेः॥अन्यथापसिद्धांतात्॥नाप्यात्मसंब
ध्याधारत्वंसात्मकत्वं॥पक्षेजीवदितिपदवैयर्थ्यापत्तेः॥मतशरीरेपिसाध्यसत्त्वात्॥
पक्षेसिद्धसाधनाच्च॥घटादावपिसाध्यसत्त्वेनव्यतिरेकव्याप्तिभावापत्तिश्च॥नचादृष्टा
श्रयसंबंधाधारत्वंविवक्षितं॥तस्यशरीरेप्रमाणाभावेनबाधितत्वादितिचेन्न॥भोग
नियामकात्मसंबंधाधारत्वंसात्मकत्वमित्यनुमानात्॥शरीरावयवेसाध्यसंदेहादयद्व्य
यांएवतदनुमानप्रवृत्तेर्नान्यत्रेति॥नचतर्हिसंदिग्धानैकांतिकता॥निश्चयसाध्याभाव
वतिहेतुसंदेहस्यैवसंदिग्धानैकांतिकता॥ननुसाध्यसंदेहेसतिहेतुर्निश्चयमेवयस्यतथा
त्वं॥अनुमानमात्रोच्छेदापत्तेः॥अतएवात्रसात्मकत्वसाध्यंप्रसिद्ध्यप्रसिद्ध्यवा॥सा
ध्यप्रसिद्ध्यस्थलेहेतुसत्त्वेअन्वयित्वं॥असतेअसाधारण्यं॥द्वितीयेकथंव्याप्ति
ग्रहणंदृष्टांतेपरास्तं॥संदेहेपायावयवसाध्यप्रसिद्धेः शरीरावयवेसत्त्वा

सं सर्गेव्यभिचारवारणायतदुपादानात्॥मुख्यमनेतुव्याप्तिग्रहार्थमेवेदम्॥ ४१॥

त्॥वस्तुतस्तुइच्छांसंतानाभावाश्रयतावद्देदकंनेरात्म्यंतदभावः सात्मकत्वं॥ तदेवात्रसाध्यं॥
तत्रसाध्यप्रसिद्ध्यैनर्गं॥तत्राभावव्यापकताहेत्वभावस्यगृह्यते॥तत्रसाध्यप्रसिद्धि
नंगं॥तांविनातदभावात्॥यत्रभावव्यापकताहेत्व भावस्यगृह्येतनत्रतद्धिनाप्यव्याप्तिग्र
हाक्षिप्तिसारं॥तथेति॥प्राणादिमत्ताभावाभावेदित्यर्थः॥अभावात्अज्ञानात्तुअ
न्वयसहचारज्ञानमात्रजन्यव्याप्तिग्रहविषयत्वंके४ नस्मात्प्राणादिमत्ताभावा
वादित्यर्थः॥ नतथानात्मकत्वाभावादित्यर्थः॥ ~~मुख्यमनेतुव्याप्तिग्रहार्थमेवेदं~~
~~तंमतेनिषिद्धत्वात्तस्मानेतुं~~ वस्तुवायिलक्षणमभिधायतेनान्य
थयति॥केचिदिति॥विशेषयंति॥अत्राभिधेयत्वंविशेषणनिष्णांसंतानाभावप्रति
योगिनइतिसंज्ञायाधीनावासिसाधीवाधीनावापक्षनाबोध्या॥प्रमेयत्वादि
ति॥नचप्रमेयत्वंप्रमाविषयत्वं॥तत्रनिश्चयत्वमात्रस्यसामर्थ्यंप्रमापदंप्रपदंवा
व्यर्थमितिवाच्यं॥असत्यातिनादिमतेतुतेनविनाव्याप्तिग्रहाभावादितिवदंति॥
तथाहि॥यद्यप्रसिद्धिर्धर्मग्रहंविनायत्रव्याप्तिर्नगृह्यतेतदृत्तिर्धर्मस्वीयपक्षपदंतत्र
साधर्थकं॥एवंचप्रमेयत्वंतत्रपविशेषोपाधिरूपहेतोःप्रमापदपरित्यागेनदूषितं॥ राम
१३

यतावद्धेर्कपरिस्फूर्तौ व्याप्तिग्रहः॥ नतुपादानेचतद्धर्मिव्याप्यतावच्छेदकपरिस्फूर्तौ
व्याप्तिग्रहःसंभवतसामग्रीकोभवेत्॥अतएवात्रप्रसिद्धिवारकविशेषणंसार्थकं॥सत्यांम
व्यप्रसिद्धौव्याप्तिज्ञानाभावेनव्याप्तेरग्रहइति॥तंन॥एवंहिनीलधूमादिसत्राप्यव्य
विशेषणानर्थक्यात्॥तथाहि॥नीलधूमहेतोर्नीलपटपरिसोगतद्धर्मिव्याप्यतावच्छेदकरूप
परिस्फूर्तौव्याप्तिग्रहोभावात्॥नतुपादानेचतद्धर्मिव्याप्यतावच्छेदकरूपपरिस्फूर्तौव्याप्तिग्रहो
भवतीतिवक्तुंशक्यत्वात्॥यदिचनीलधूमहेतुस्फूर्तेणतेनगृह्येत॥तथाव्याप्तिग्रहोपयो
गि॥येनविनाप्यिगृह्येतनचोपयोगि॥यथानीलपदंप्रकृतेचप्रमाणेनव्याप्तिग्र
हःकृतयमानःप्रमात्वनिष्ठमेवव्याप्तिंविषयीकुर्यात्॥नतुप्रमेयत्वनिष्ठं॥प्रमाणस्य
प्रमेयत्वेऽवृत्तेः॥तथाचविशेषपदमंतरेणविशेषोपाधिनिष्ठव्याप्तेरग्रहात्भवति
सार्थकंतेनवेय्यर्थ्यंनवैय्यर्थ्यबीजाभावात्॥एकत्रधर्मेणीलधूमगुरुत्वधर्मसमावेशेचल
घुगुरुत्वधर्मेणोवव्याप्तिग्रहः संभवेनगुरुणाधर्मेणव्याप्तिग्रहस्तेनैवव्यर्थत्वंजी
वातुं॥यथानीलधूमादिसत्रप्रकृतेननथा॥प्रमाणस्यप्रमेयत्वेऽवृत्तेः॥इत्युक्त
रूपंलक्षणमिति॥अन्यथाव्याप्तिग्रहोपयोगिविशेषणंसार्थकं॥तथास्वरूपसिद्धिना

३२॥ रकमपि पक्षतामग्रहोपयोगित्वात्कथंनसार्थकं अनुमितिप्रयोजकत्वाविशेषादितिनियोग
समाधानं चिंत्यमितिसूरिभिरिति॥ आस्तां विस्तरः॥ केवलान्वयीति॥ निवर्त्तनीयाविष
क्षकर्त्तृत्वशंकाविरहादिसाद्गुण्यः॥ केवलेति संयोगान्वयव्याप्तिग्रहासंभवादिति भावः॥
य थपिपक्षत्वादिनांकेवलान्वयित्वानानुव्यावर्त्तकत्वं॥ तथापिपदप्रवृत्तिनिमित्तत्वेनया
न्वयः॥ संदिग्धइति॥ संदिग्धत्वंतत्साध्यंचसंदिग्धत्वंधर्मीएवेत्यनियमः॥ धर्मिणिचूक्व
लादिदृष्टांतेनविरोधापत्तेः किंतुसिद्धिमित्यर्थः॥ यथाश्रुतेतथार्थकत्वापत्तिः॥ इतिध्येयं॥
नचसंदेहेति॥ साध्याप्रसिद्धेरित्यर्थः॥ अन्यथेति॥ सोऽपीत्यर्थः॥ नन्वेषापत्तिः॥
तददृष्टेनात्॥ साध्याप्रसिद्धेस्तद्व्यापकत्वाच्च॥ साध्येति॥ अत्रविशेषणभागमात्रस्ये
वलक्षणत्वेधूमानुमानेप्रमेयत्वंगतं॥ अतोविशेष्यभागः॥ वन्मात्रस्यचक्षणत्वंत्रै
वानुमानेगतं॥ अतोविशेषणभागः॥ ननुपर्वतेरत्वादावतिव्याप्तिः॥ तत्रोक्तलक्षणा
स्यसत्वात्॥ नचसाधनावच्छिन्नसाध्यव्यापकतातत्राप्यस्तेवेति
ध्यव्यापकोविवक्षितैवनेतिवाच्यं॥ धूमानुमानेप्रमेयत्वंनिवार्यं॥ तंजकत्व
स्योपाधित्वप्रसंगात्॥ महानसत्वावच्छिन्नसाध्यव्यापकत्वात्॥ धूमाव्यापकत्वा
दितिचेन्न॥ विपक्षेबाधकेनैवहेतोः साध्यव्याप्यत्वेनसाध्यव्यापकत्व

४ × इतिकाधाङ्गपरिणामरूपोपाधावतिव्याप्तेश्च॥ तस्यसाध्यव्यापकत्वाभावात्॥ ×४

यांशंजनवत्वस्यसाध्यव्यापकत्वाभावेनातिव्याप्यभावात्॥ यधर्मावच्छिन्नसाध्यव्यापक
त्वेनधर्मावच्छिन्नसाधनाव्यापकत्वं॥ अतोनातिव्याप्तिरितिदिक्॥ सव्यभिचारइति॥
स्वस्थानेति क्रमपरिव्यभिचारः॥ स्वस्थानंचसपक्षेति क्रमपांतु नतुसाध्यासंता भा
वद्बुद्धित्वं॥ असाधारणेऽव्याप्तिप्रसंगात्॥ स्वस्थानेति क्रमपांतु घा॥ स्वस्थानम
तिक्रम्यअन्यत्रापिसपक्षेनस्वस्थानवृत्तित्वसंकोचेनवा॥ तत्रा धसाधारणेतु
तीयमसाधारणमितिध्येयं॥ तत्रेति॥ तत्रपक्षपदंस्वरूपासिद्धौ॥ विपक्षपदंनास्तेति
पक्षपदंविरुद्धेतिवारणाय॥ केचित्तु॥ विपक्षवृत्तित्वमात्रंलक्षणं विरुद्धसाधारण
मितिवदंति॥ सपक्षइति॥ सपक्षेसतीतिविशेषणं तेननकेवलव्यतिरेकिण्यतिप्रस
नः॥ सकलेति॥ सकलेतिविशेषणांतेनधूमेनाग्नेर्व्याप्तिमितिध्येयं॥ साध्यविपरीत
साधकइत्यनंतरंसमबलमितिशेषः॥ तेनाधिकबलेनन्यूनबलेनवानतिव्या
व्याप्तिप्रसंगइतिध्येयं॥ विपक्षइति॥ एतच्चसद्धेतोरतिव्याप्तिवारणाय॥ बाधि
तविषयइत्यनंतरंसएवेति॥ विशेषणांतेनपूर्ववदस्यलक्षणांतरत्वंत्रभ्रमोनभ
वतीतिध्येयं॥॥ छ॥ छ॥ इतिअनुमानपरिच्छेदः समाप्तः॥ छ॥ छ॥ छ॥ ध॥

श्रीरस्तु॥ अतिदेशेति॥ अत्रगोपदंकाचिकाभिप्रायेणानलक्षणांतर्गतं॥ उपमानं रेअव्याप्तेः॥ सहकृतोतंव्यापारदृश्यनायसादृश्योपमानस्यैवात्रलक्षणमितिनो यमानांतरेअव्याप्तिरितिनश्रंकनीयेतिसादृश्यविशिष्टंज्ञानमुपमानमिति निर्गलितोर्थइतिबोध्यं॥ इत्युपमानपरिच्छेदः समाप्तः॥ छ॥ ६५॥ हयवद्गवय॥ आप्तेति॥ अत्रआप्तवाक्यंशब्दप्रमाणमात्रं॥ तथाचवाक्यंशब्दइतिकेअयोग्यशब्दइतिवा लिः॥ मदर्थमाप्तेति॥ शब्दइतिशब्दप्रमाणमित्यर्थः॥ तेनयोग्यशब्देव नान्याप्तिरिति ध्येयं॥ इयमात्रावधेयं॥ आप्तशब्दः आप्तज्ञानमित्यर्थः॥ तेनशब्दस्याप्तेनाशि तयाकथंप्रमाकरणत्वे॥ अनीश्वरस्मरणानांनापिवाक्यार्थज्ञानोदयाच्चेति॥ दूषणंपरो स्त्री॥ आप्तस्येति॥ ननुयथाभूतत्वंयथावत्तमानत्वंवा॥ नाद्यः॥ वस्तुतोप्यनिर्द्यंभूत ह्रेघट्वेवेनज्ञात्वाघटवद्भूतलमितिप्रयोगात्तत्रकुतोतत्प्रसंगाद्य॥ नद्वितीयः॥ कदाचि त्घट्वाद्यितभूतलेघटाभावदशायांघट्वद्भूतलमितिवाक्यप्रयोक्तुः आप्तत्वप्रसंगात्॥ नचयस्मिन्काले नत्रनास्त्रयाकाआसइतिवाच्यं॥ संयुक्तसमवायनगंधवति अत्रसमवायवज्जभमितिप्रयोक्तुराप्तत्वापत्तेः॥ नचयेनसंबंधेनास्त्रयाप्तिपूर णीयमितिवाच्यमिति॥ अत्रावच्छेदेन संयोगवन्नक्षादौमलत्वावच्छेदनसंयो

६ × यथानुभूतत्वेवा ६

नाम ॥३५॥

गावच्छेदेननसंबंधोदासीन्येनभवच्छेदकोदासीन्येननाकप्रयोक्तुरनाप्तत्वापत्ति निचेतु॥

रालानितिवक्तुराप्तत्वापत्तेः॥ नचयदवच्छेदेनतदवच्छेदेनेत्यपिपरणीयंकिंप्रयोजनं ज्ञानविषयत्वेनार्थाः साकांक्षाः॥ नत्वितिपादकत्वेनपदानिसाकांक्षाणीतिपूर्वप्र तं॥ इहतुआकांक्षाप्रयोजकज्ञानविषयत्वेनपदानिसाकांक्षाणीतिप्रतिपाद्यत्वेन र्थाः आकांक्षाउच्यंते॥ इतिपूर्वभेदः॥ जनकानिजनकज्ञानविषयाणीत्यर्थः॥ पूर्व मेतन्नाह॥ एवमिति॥ एकेनवेति॥ इदंचनलक्षणांतर्गतंनेतत्स्यामदमत्तवारणनैरा लस्वंउजस्वमस्यदूरणेनाव्याप्तिरितिध्येयं॥ अविलंबेनेति॥ अन्यथविलंबोचिरवि लंबाभावेत्यर्थः॥ नेननेत्रेवाव्याप्तिरितिध्येयं॥ पदंचेति॥ जनगउदूरइत्यत्रापि अतिव्याप्तिः॥ नलगतीतिध्येयं॥ ६ × एकपदमित्यत्रनास्त्रयात्॥ नेनवर्णात्म कपदेनास्त्रयात्॥ ७५॥ ननुएककालस्थात्वं समूहः॥ नाद्यः॥ चारुणेनाग्निनावप्र नांतत्संभवतीयकालोदासिन्येनसंबंधोदासिन्येनावच्छेदकोदासिन्येनव यप्रयोक्तुराप्तत्वापत्तिरितिचेत्॥ अत्रक्रमः॥ यस्मिन्देशेयस्मिन्काले यनसंबंधेनयत्स्वावच्छेदेनयद्धर्मावच्छेदेनयद्धर्मावच्छेदेनतत्प्रमा प्रयोक्तास्त्रयतीतिविवक्षितं॥ नाकांक्षादेरवृत्तित्वात्॥ नत्वितिपादकप्रयोक्तु रनाप्तत्वापत्तिः॥ तस्यापिदूरत्वकालत्वसंगीकारात्॥ अन्यथादूरत्वकालयोः सर्व

धारणाभज्जेतारूतिदिक्॥ वाक्यंतिति॥ आप्तवाक्यमेवतदर्थः॥ तेनशब्दप्रमाणलक्षणेना
सत्पदवैयर्थ्यमिति॥ यस्यपदस्ययेनपदंविनाऽन्वयबोधाजनकत्वंतत्तेनपदे
नसाकांक्षम्॥ प्रकृतवाक्यार्थबोधोयोग्यता॥ अन्वयबोधाविरोधिव्यवधानाभा
वःआसत्तिः॥ इतित्रयाणांलक्षणमवगंतव्यं॥ आकांक्षापदकृत्यमाह॥ श्रो
त्रएवेति॥ यथाश्रुतेनसंकेतेनेत्यर्थः॥ नन्विति॥ अत्रसाकांक्षत्वाभिमतस्यचैत्रपद
यथाश्रुतेनसमभिव्याहृतत्वं॥ सएवमिति॥ स्यादिति॥ स्वरूपाख्यातेसत्यर्थः॥ एवंहीति॥ परस्परविव
क्षायामाह॥ समभिव्याहृतत्वं॥ ननुतथापिदुर्लभंमनसायपदादौद्वितीयादिव
र्णज्ञानकालेप्रथमवर्णेविनाऽर्थज्ञानासंभवाऽतआह॥ नचैवमिति॥ अत
भयेति॥ एतेनअन्त्यवर्णाभावात्॥ कथंतत्संस्कारसहितेश्रोत्रेणेतिरूपणं
रास्त॥ अंत्यवर्णेति॥ एतेप्रथमज्ञानकालेअंत्यवर्णाभावात्॥ संस्कारासंभवा
च्च॥ कथंपदज्ञानमितिरूपणंपरास्तं॥ पूर्वपूर्वेति॥ यत्तूपलक्षणं॥ पूर्वपूर्ववर्ण
ज्ञानजातिविषयसंस्कारसहकृतेनेत्यर्थः॥ केचित्तु जातिज्ञानाभावा
त्॥ तन्नकारकज्ञानमितिरूपणंपरास्तं॥ एतेनचैत्रचर्मवर्णज्ञानकालेकथंप्रथम
द्विवर्णज्ञानंप्रत्यासत्यभावात्॥ नचातीतस्यापिवर्णस्यश्रोत्रसमवायोस्तेवेतिवाच्यं॥ नाम

॥३५॥

समवायरूपप्रत्यासत्याहिप्रथमवर्णज्ञानंतोकिंकमेवस्यात्॥ नतलोकिकं॥ योग्यत्वा
त्॥ तदपिनसंभवतीति॥ विषयाभावादितिरूपणंपरास्तं॥ संस्कारस्येवात्रप्रत्यासत्ति
त्वात्॥ नन्वनार्हपदज्ञानस्यसंस्कारजन्यत्वेस्मृतित्वापत्तिः॥ संस्कारत्वेनतज्जन्यत्व
स्यस्मृतित्वेप्रयोजकत्वात्॥ अन्यथाप्रत्यभिज्ञायांतत्वापत्तेः॥ इहचप्रत्यासत्तित्वे
नतज्जन्यत्वमितिनस्मृतित्वापत्तिरिति॥ अंत्यवर्णेति॥ यत्नेनचरमवर्णसंनिक
र्षाभावात्॥ कथंतवगास्नीपदप्रतीतिरितिरूपणंपरास्तं॥ नन्वेवंजानन्नपितद्वा
क्यंनान्वयाबोधायालंघुत्वज्ञानसंकेतज्ञानाभावादतआह॥ पदव्युत्पत्तिपदंनपद
साघुत्वज्ञानंहिचयन्मतेसाधुत्वज्ञानंशब्दबोधोकारणं॥ अपभ्रंशादौ
चसाधुशब्दे लक्षणं॥ नन्मतेपिप्रायेण॥ नथार्चसाधुत्वंकिंप्रकारकमेवपद
ज्ञानंश्रोत्रेणजन्यतेइतिभावः॥ एकदेवेति॥ एकैवेत्यर्थः॥ तेनसमूहलक्षणं॥
सुरुच्छमिसाशयः॥ ननुअसद्वर्णं॥ विषयकज्ञानंश्रोत्रेणतदानवगतेरूष्मवि
षयकज्ञानंजन्यतेत्यनआह॥ सत्कारीतिं॥ तत्रसंस्काराभावान्नतत्रस
त्कारीत्याशयः॥ ईदृशेनप्रबंधेनपदप्रतीतिरित्युत्साधवाक्यप्रतीतिर्न्युत्साद

सा

ते

श्रो

पदेति

यनिगततद्धनि॥ तदिदमिति॥ गदयंशब्दमित्यर्थः॥ वाक्यमितितात्पर्यमित्यर्थः॥ तिन्नोपः॥
सर्वस्यैवेति॥ वेदः केनचित्प्रणीतः वाक्यत्वात्॥ काश्यपवाक्यवत्॥ इतिप्रमा
णमात्रानुसंधेयं॥छ॥ छ॥ इतिशब्दपरिच्छेदः समाप्तः॥ छ॥ छ॥ छ॥ छ॥ छ॥
सुधारिभट्टीयशब्दपरिच्छेदः समाप्तः॥ श्रीहयग्रीवायनमः॥ राघवेंद्रायनमः॥

स श्री॥ अनुपपत्तिज्ञानं करणं॥ स्वरूपेतीअनुपपत्तेरेवाकरणत्वे॥ रात्रिभोजनाद्दिप्रमाण
लीनित्यादाविवकरणत्वमितिभाट्टमतंदूषयितुमनुवदति॥ नन्विति॥ प्रमाणमिवेति॥ प्र
मितिरित्यर्थः॥ तेनतत्करणत्वेनअनुपपत्तिज्ञानार्थंस्वतंत्रप्रमाणंमृग्यइत्याशयः॥
तामेवप्रथमतोव्यवच्छिनत्तियति॥ तथाहीति॥ तद्वाचकशब्दइत्यपिनार्थः॥ तेनऋतद्वयेन
नविरोधोनभवतीतिनोऽर्थः॥ प्रमाणप्रमितिःप्रत्यक्षाद्धिभ्यःप्रत्यक्षप्रमादिभ्यः॥ हि
वेति॥ योगिनोगिभोगिभिन्नलक्षतीयपिनोऽर्थः॥ घटति॥ ननुसामान्यतःप्रतियोगिज्ञा
नस्याभावज्ञानेहेतुत्वात्कथंअनुपलब्धिःज्ञाप्यर्थइतिचेत्॥ नवप्रतियोगिसाक्षात्काराभाव
ज्ञानुपलब्धिर्ज्ञाप्यइतिवाच्यं॥ व्याप्यायंघटप्रत्यक्षानंतरंअंगणेघटाभावप्र
त्यक्षानापत्तेः॥ अथतदधिकरणाप्रतियोगिप्रत्यक्षात्कोनुपलब्धिः॥ तर्हिवायोरूप

रात्रिभोजनमिति॥ ६

भावज्ञानंनस्यात्॥ अथाधिकरणंवायुरूपंप्रसिध्यत्प्रतियोगिप्रत्यक्षमपिघटादौ
प्रसिध्यं॥ तद्विषयत्वाभावश्चाधिकरणनिष्ठानुपलब्धिःज्ञाप्यर्थइतिचेत्॥ तर्हिवायो
वासपीत्यक्षेविषयत्वाभावस्यप्रत्यक्षंनस्यात्॥ वस्तुतोधिकरणाप्रतियोगिस
ंबंधविषयकचाक्षुषप्रत्यक्षविषयत्वात्॥ नचाधिकरणेऽभावग्राहकेंद्रियजन्यप्र
तियोगिप्रत्यक्षविषयत्वाभावानुपलब्धिर्ज्ञाप्यर्थइतिवाच्यं॥ एवंहिकुत्राप्यभावज्ञा
नंनस्यात्॥ अधिकरणेभूतलादौअभावग्राहकेंद्रियजन्याहार्यप्रत्यक्षविषयत्वादा
नाप्यनिषिध्यतइत्यभ्युपगमात्॥ नचानाहार्यत्वमप्रत्यक्षेविशेषणमितिवाच्यं॥
स्तंभेपिनाचाभावज्ञानानापत्तेः॥ तत्रतादृग्प्रतियोगिप्रत्यक्षाप्रसिध्येः॥ अथप्र
तियोगितादृगधिकरणाप्रत्यक्षविषयत्वाभावोअनुपलब्धिर्ज्ञाप्यर्थइतिचेत्॥
तर्हिवायोरूपाभावप्रत्यक्षंनस्यात्॥ तादृगधिकरणाप्रत्यक्षाप्रसिध्येः॥ किंचकाला
न्तरेपुरुषंतत्रचवर्तमानंतादृग्प्रत्यक्षंतद्विषयत्वस्याधिकरणाप्रतियोगिसंबंधत्वात्॥ नि च
तर्हिंद्रियजन्यानस्मृत्यतत्कालीनाहार्यप्रत्यक्षप्रतियोग्यधिकरणासंसर्गो
विषयत्वाभावोअनुपलब्धिर्ज्ञाप्यवाच्यः॥ संसर्गोभावप्रत्यक्षहेतुःतादृग्प्रत्यक्षप्र

२ ४ कथंघटाद्यभावइतिधीरितिचेन्न॥ २

तियोगितादात्म्यविषयताभावोऽनुपलब्धिरूपत्वाच्चाभावप्रत्यक्षे हेतुरिति॥ ननु अनुपलब्धिर्यद्यभावग्रहकोपरमाणौ घटाभावेऽपि गृह्येत तर्हि चेन्न॥ योग्यानुपलब्धेर्हेतुत्वात्॥ योग्यता च प्रतियोगितावच्छेदकतत्सकलप्रतियोग्युपलम्भकसामग्रीसमवधानम्॥ तत्किं तत्प्रतियोगित्वं प्रसञ्जितप्रतियोगिकत्वं योग्यत्वमिति वक्तव्ये गतिः इयमत्रभवतिविवक्षितेति॥ वक्ष्यति॥ संबंधार्थज्ञानजनकानीत्यर्थः॥ मात्रपदप्रवेशस्त्वभावस्वरूपमात्रायत्तसिद्धसाधनमित्यभ्युपेत्य॥ हेतोर्ज्ञानपदं प्रत्यक्षपरं॥ परमाण्वादौ व्यभिचारज्ञानादौ च व्यभिचारवारणाय॥ ननु घटव्यभिचारदशायामाह॥ यद्वेति॥ ननु अभावस्यापीन्द्रियसंबंधत्वात्प्रत्यक्षेणैव ग्रहणात्किमनुमानेनेत्यत आह॥ न चेति॥ द्रव्यलाभानादयुतसिद्धत्वाभावादिसाध्यायः॥ इदमुपलक्षणं॥ अभावस्य भूतलादेरसमवायिलाभेन्द्रियाभावयोः संयुक्तसमवायोक्तिरुपेक्ष्या॥ न चाभावइति॥ न च विशेषणत्वमुपाधिरूपमेव॥ तच्च अभावेऽस्यादिति वाच्यं॥ पर्याप्तसंबंधेजातिविशेषोपाधिरिति सिद्धान्तानुसारेण तदभिधानात्॥ तस्मादिति॥ स्वप्रतियोगिकवैशिष्ट्यावगाहिप्रतीतिजनकं यत्स्वरूपं तद्विशेषणमित्यर्थः॥ स्वप्रतियोगि

॥३७॥

५

सं

तीति॥ स्वनिरूपितव्याप्तिप्रयोजकज्ञानविषयीभूतमित्यर्थः॥ सामान्यादीति॥ उपाधेरपि पर्याप्तसंबंधजातिरूपतादित्यर्थः॥ ननु यथादंडादौ विशेषणत्वादिकं नास्तीत्यभावेऽपि विशेषणत्वात्॥ सत्वात्॥ एवमेव प्रमेयत्वमपि नास्तीत्यभावेऽपि प्रमेयत्वात्॥ नचेष्टापत्तिः॥ तथासति केवलान्वयिधर्मावच्छेदापत्तेरित्यनुद्धाय नाह॥ नाप्युभयाश्रितइति॥ ननु तदपि नमनोनमंसंयुक्तसमवायस्योभयाश्रितत्वाभावेऽपि संबंधत्वात्॥ युक्तसमवायोहि संयोगः तदाश्रयः समवायश्च तत्र संयोगो नोभयत्रितः रूपवत्सत्वात्॥ नापि समवायः॥ रूपस्य चक्षुर्ग्राह्यत्वेः॥ तथाचोभयाश्रितत्वाभावेऽपि तस्य यथासंबंधः स्तथाविशेषणविशेष्यभावस्यापि प्रकृतसंसर्गसादाह॥ नाप्येकइति॥ ननु एकत्वाभावेऽपि संयुक्तसमवायस्य प्रसक्तत्वे तथेहाप्येकइति दोषसंयवदोषांतरमाह॥ भावेति॥ असंबंधेति॥ यदि ह्यसंबंधएवाभावोऽनिंद्रियेणागृह्यते तदा वायावपीन्द्रियेघटाभावोगृह्येतेति प्रसंगइत्यर्थः॥ समूहश्चेति॥ अनुपलब्धेस्तत्रापिसत्वादिति भावः॥ ॥६७॥६७॥ ॥६७॥६७॥ ॥ननु प्रमेयत्वनिरूपणं व्यर्थं तेन प्रमाणप्रमेयत्वार्थकं तत्वज्ञानमेवविधेयं॥ तच्चासंभवी॥ प्रमाणत्वं प्रमाकरणत्वरूपस्य प्रमाण

दित्वात्तु प्रमाज्ञानं चक्षुस्तः संज्ञायानुपपत्तेः॥ नापि पक्षतः अनवस्थापत्तेरित्यतआह॥ इदानीमिति॥ इदं बुध्यिस्थं प्रामाण्यमिदानीं अवगमेनेति पक्षतस्त्वेतिशेषः॥ अत्रपूर्वपक्षी भाट्टः तस्यमतमुत्थापयति॥ अत्रेति॥ ननुस्वेनेति स्वतः तथाचस्वस्मिन्नपि नस्वस्य प्रामाण्ये स्वेनैवावच्छिद्यते॥ स्वस्मैवातीन्द्रियत्वात्तु॥ स्वयंग्रहणाद्धेतोर्नतथेत्यर्थः॥ तथात्वादिति अत्राह॥ येनेनेति॥ तेनेति॥ ननुचैतत्सिध्यतीत्यसंगतं॥ नैयायिकमतेपिज्ञान ग्रहकेणैव प्रामाण्यग्रहणात्तु॥ ज्ञानग्राहकादन्यस्य प्रामाण्यग्राहकत्वाभावाच्च॥ प्रामाण्यग्रहे ज्ञानग्राहकातिरिक्तानपेक्षणाच्चेति चेन्न॥ प्रामाण्यग्राहकभिन्नायावद्ज्ञानग्राहकगाध्यवसेयस्वस्वतस्त्वपदार्थत्वात्तु॥ अत्रसिध्यसाधनवानगायेयावत्पदं॥ अत्र प्रामाण्यप्रामाण्याभावग्राहकसामग्र्याज्ञानपदादिनाचबाधवानगायाप्रामाण्यग्राहकभिन्नमितिदिक्कु॥ ज्ञाततेनानुक्तिप्रमाणाभावोकुतस्तस्यज्ञानग्राहकत्वंकुतस्तमंतन्निष्ठप्रामाण्यग्राहकत्वमितिसाध्यनसमाधत्ते॥ अत्रोच्यतइति॥ ज्ञानेति॥ सिध्येनैवोपपत्तावतिरिक्तकल्पनेगौरवमितिभावः॥ ननुविषयत्वमेवज्ञाततानामतनोसंभवति॥ तथाहि॥ घटोयमितिज्ञानेघटएवविषयोनपटइत्यत्रकोनियामकः। नचतज्ज्ञानयो

स्वरूपकृकाविशेषोनभवतीतिध्येयं॥ तदुक्तंज्ञानकृतेनेतरथेति॥ ४४

स्तादात्म्यमनभ्युपगमात्तु॥ नापितज्ज्ञानजनकत्वंचक्षुरादावतिप्रसक्तेः॥ अतस्तज्ज्ञानेनघटे ज्ञाततोज्ज्ञानेतिघटएवनज्ञानविषयोनपटइतिवाच्यं॥ तथाचाधीगतंज्ञाततयेतिरीकृते॥ नन्विति॥ एवकारोभिन्नक्रमः॥ तेनज्ञानविषयत्वमेवज्ञानजन्यज्ञाततावारत्वंतत्तन्मतमित्यर्थः॥ अतएवेति॥ नचतत्रापिज्ञातोज्ञाततासंवलितोवाच्यं॥ एवमपिव्यर्थोज्ञानविषयतामापत्तेः॥ अन्यनिष्ठज्ञाततायपिअन्यस्यविषयत्वेऽतिप्रसंगादितिभावः किमिति॥ अन्यथाइष्टाद्दृष्टोघटइत्यादिप्रतीसाइष्टतादीनामपिपदार्थतापत्तेरिष्टापद्दृष्टत्वं॥ ननुवंघटात्पटोभिन्नइतिप्रतीयाभेदोनस्यात्॥ स्वभावादेतादृग्प्रतीतेरुपपत्तेः॥ अन्यथाघटभेदःपटादिनाप्रतीसेनापत्तेः॥ तत्रभेदेहानेगौरवंतु॥ यहिवस्वरूपंतत्प्रतीतेरुपपादकंतत्तदाघटाद्भिन्नइत्यत्रापितत्वापत्तेरिस्वरूपसाद्दृ॥ अमुक्तवेति॥ यावज्ज्ञानग्राहकसामग्र्याभावंनतुतन्मतंनसंभवति॥ अप्रमाहिनज्ञाततया ज्ञानग्राहिकतयातद्ग्रहादिति॥ यथाभिन्नमेवप्रामाण्यग्रहनकिंचिद्दूषणं॥ तथापिज्ञानंतेनैवज्ञानहेतुतयोतनैवरूपंज्ञानमनुमानंतत्प्रमातेनातिप्रसंगादितिभावः॥ अथेति॥ तथाचयावत्तत्तदाश्रयग्राहकसामग्र्याधीतंतदितिफलितोभावः॥ विवादाध्यासितंसमर्थप्र

॥३९॥

रत्तिज्ञानकादृपपादनंचबाधस्वरूपासिध्यनावणायजलपदं॥पक्षतावच्छेदकहेतवोनक्ष
सिध्यसाधनवावणायहेतोश्चकालेव्यभिचारेव्याप्यज्ञानपदंज्ञेयं॥नजातीयत्वेनसमथं
प्रवृत्तिजन्यज्ञानजातीयत्वेनतज्जातीयत्वंस्नेहवद्विशेष्यकजलत्वप्रकारकज्ञानत्वादि
नाज्ञेयं॥ज्ञानग्रहकालेति॥येवकोयावदर्थकइतिध्येयं॥ ॥७॥ ॥७॥ प०
श्रीवेदव्यासायनमः॥आत्मत्वेति॥नचात्रसामान्यपदंव्यर्थमितिवाच्यं॥अपोहवादि
नियासायतदुपादानादितिकेचित्॥कालेतिव्याप्तिवावणायतत्तुतत्रजातिव्यक्ति
भावेनात्मत्वेनात्मनिविवक्षासूचकत्वादित्यन्ये॥येनसहआत्मतत्समवायः सः
आत्मेतिविवक्षासूचकत्वेननत्रैवातिव्याप्तिवावणायतदित्यपरे॥आत्मत्ववानात्म
त्वंलक्षणं॥द्रव्येतान्यद्रव्यत्वव्याप्यज्ञानसमानाधिकरणसामान्यवानिसध्यहान
णाद्वितीयमितिलक्षणद्वयसूचकत्वेनतत्साथकमिसूचुः॥नन्वात्मनःज्ञानेनैवि
यत्वेलाघवेनतद्द्वयलक्षणाभ्यामेवचरितार्थत्वात्तदुद्देश्यलक्षणेअनुपपन्नेसत
आह॥सचेति॥नन्वत्रकिंमानं॥अग्रिमग्रन्थेनकिंवोपस्कारोधत्वादितिचेत्॥
अत्रकेचित्॥आत्मनःज्ञानीयत्वेसमुदायोःसमानविशेष्यकमेको ॥३९॥

॥४०॥ यंमयोत्पादयेयंविधयाप्रतिष्ठयावाणागन्नतेनान्यत्वइत्रकिंनियामकंनतावद्दृष्टंतस्ये
वतज्जन्मकृतत्वेतुल्यत्वात्॥जन्मांतरीयस्यास्मरणभवात्॥नचस्वभावएवतथा॥पदार्थवैचि
त्र्यावच्छेदापत्तेः॥तस्माच्छरीरद्वयभिन्नमात्मद्वयंवाच्यं॥तत्रचैकेनैजन्मांतरेविहितकर्म
नुष्ठितमन्येननेतिसिध्यं॥आत्मनःज्ञानीयत्वमिति॥अन्यत्वपरिमाणभेदात्तुद्रव्यत्व
दातुजालदहस्यापिनष्टत्वाद्दृश्यज्ञानीयत्वस्यान्यस्यवोत्पत्तेः॥योपिबालेपितावन्नेभुवनू
सरेवाहेवाधर्मेपुत्रणोत्रादिकेअनुभवामीयभेदावगाहिप्रत्ययेनात्मनःज्ञानीयभिन्न
त्वमित्याहुः॥नन्वात्मत्वसामान्यवानात्मसंज्ञावितकक्षणं॥आत्मनःएकत्वेनआत्मत्व
सामान्याभावादतआहा॥प्रतिज्ञानीयंभिन्नइति॥एककालीनज्ञानीयंप्रतीत्यर्थःएतेन
जालतरुणदृश्यज्ञानीयापिनष्टत्वानत्रआत्मभेदाभावादिदमयुक्तमितिपरास्तं॥
यद्वाविजातीयज्ञानीयप्रतीत्यर्थः॥नन्वत्रकिंमानमितिचेत्॥अत्रेवदंति॥आत्मैकोनैत्र
सुखीमैत्रोदुःखीतिसुखदुःखवैचित्र्यंनस्यात्॥नचयथागगनैक्येतारमंदत्वादिश्च
यथा च यंव्यवस्थावच्छेदकभेदान्नैरर्कान्यवज्ज्ञानीयआत्मैक्येपिकरचरणाधवच्छेदभेदेन
सुखदुःखव्यवस्था॥तथानानादेहस्थेपिआत्मैक्येसुखदुःखवैचित्र्यंस्यादेवेतिवाच्यं

तदनुसंधानापत्तेः॥यथा चैत्रस्यैव चरणाधवच्छेदेन दुःखीसएव चरणाधवच्छेदेन मैत्रस्यापि दुःखीसएव मैत्रदेहे दुःखीतिअनुसंधानंस्यादिति॥ननुदेहेचैत्रादिदेहविशिष्टस्यानुसंधानमापद्यतेऽतत्तदुपलक्षितस्यवा॥नाद्यः॥दृष्टेतत्तदभावात्॥अंत्येविशिष्टपत्तिरितिचेन्न॥तथापिचाइनास्यात्मानुसंधानादापादनात्॥इतिदिक्॥नन्वीश्वरेपिभागएवात्मेतिमतमपाकरोति॥विभुरितिति॥ननुनानीवयक्तिवित्कोपिप्रतिनानीरंभिन्नोपिविभुरपिचात्मिसएवकर्थंनस्यादित्याशंक्याहकालादिवदिति॥ननुआत्मास्तीत्यत्रकिंमानंअतआह॥सचेति॥ननुप्रत्यक्षंकथायांनोद्रव्यमनआहु॥विप्रतिपत्तावितिकर्तव्यव्यतिरिक्तेकिंचिन्नोपपत्तिसिद्धमूर्ध्वमाह॥तथाहीति॥आत्मनिव्यभिचारत्वाद्धेतोरयमनियमइतीति॥तावन्मात्रंघटादौभोगेचानीतिचनभागः॥तदर्थंश्रेकमात्रेंद्रियग्राह्यजातिमत्वं॥नातीन्द्रियप्रत्यक्षेभोगानुमितिरितिभावः॥अतएवनध्यादिभागभावेनव्यभिचारः॥अतएवननिर्विकल्पकेभागानुमितिरितिध्येयं॥सर्वेति॥नन्वत्रकथंसर्वत्रकार्यापत्तेरभावइतिचेत्॥अत्रवदंति॥गोदावरीवर्तिनःचैत्रस्यभोगसाधनवस्तूपधत्तइत्यविवादं॥तच्चचैत्रादृष्टजन्यं॥तद्भोगसाधनत्वात्॥चैत्रादृष्टंचनादं॥४०॥

चेत्यनुमानेनव्याप्तेरबुध्यादयःपक्षाःतेनभागानुमितिरितिध्येयं॥

आश्रयैकदेशावर्तमानंचैत्रात्मत्वव्याप्यइतिसिद्धंचैत्रात्मनोवैभवमिति॥तन्न॥एवमपिमहीधरकंधादौयत्रचैत्रभोगसाधनंवस्तुनोपनतंतत्रात्मसत्तेमानाभावेनतस्यव्यापकत्वासिद्धेः॥नचतज्जन्मनिचैत्रस्यभोगसाधनलाभेपिजन्मांतरेतत्स्यादेवेतिवाच्यं॥प्रमाणाभावादिति॥अतएवात्मनोनिष्क्रियत्वंसर्वगादिनोसिद्धं॥तथाचभागीरथ्यांनिमज्जतःमैत्रस्यात्माभागीरथ्यांअस्तीतिवक्तव्यमेव॥अन्यथातत्रभागीरथ्यादिजलादिस्पर्शानस्यात्॥एवंभोगीरथीतःप्रचलितस्यमैत्रस्यनिश्चेश्वरंसादरमवलोकयतःविश्वेश्वरसन्निधावपिआत्मास्तीत्यपिवाच्यं॥सचभागीरथीतीरस्थोमनःसंयोगाभावज्ञानात्॥नापिसएवतत्रगतःक्रियाभावादितिअसंश्चएवआत्माव्यापकइतिपरास्तं॥वस्तुतस्तु॥तत्सर्वत्रकार्यापत्तेरभावादिसनंतरंभाकाशवदितिन्यायेषः॥तेनात्माविभुर्नित्यश्चेतिसतिज्ञानकारणसंयोगाश्रयत्वात्॥आकाशवदिति॥अनुमानमभिप्रेतं॥दृष्टांतेसाध्यवैकल्यपरिहारायसर्वत्रेत्युक्तमितिसारं॥विभुत्वादिति॥नचाप्रयोजकंनिरुपाधिकंसहचारभंगप्रसंगस्यैवबाधकत्वात्॥वीतरागजन्मादर्शनादितिन्यायेनादृष्टमपिअनुग्रहभावस्यनित्यत्वाच्च॥भोगेति॥अंशावयवेसतिभोगावच्छेदकंनागीरमित्यर्थः

स्वेति ॥ स्वाश्रयसमानाधिकरणस्वाश्रयसमानकालीनसाक्षात्कारविषयतावान्यो यो जातिमत्त्वसाक्षात्कारो भोगस्तदर्थः ॥ तेनान्यतत्स्थानानुगतत्वेनतदटितलक्षणं कथमिति परास्तं ॥ ननु त्वगादावतिव्याप्तिरत आह ॥ चेष्टेति ॥ ननु चेष्टायादिक्रिया घटादावतिप्रसंगः ॥ यदि च द्रव्यीयजन्यक्रियावदोऽन्योन्याश्रयइत आह ॥ चेष्टेति ॥ द्रव्यीयसंयुक्तमिति ॥ नन्वत्र द्रव्यीयत्वं नाम व्यापारवत्त्वं वाऽविलंबेन कार्यासाधकत्वं वा ॥ माधः ॥ कालादावतिव्याप्तिस्तावस्थ्यात् ॥ सन्निकर्षव्यभिचारवारणायद्रव्यीयसंयुक्तपदवैय्यर्थ्याच्च ॥ नद्वितीयः ॥ असंभवादिति ॥ आकाशादावतिप्रसंगपरिहारार्थमतींद्रियपदवैय्यर्थ्यापत्तेः ॥ इंद्रियावयवेतिव्याप्तेश्च ॥ नचज्ञानकारणीभूतद्रव्यीयसंयोगवत्त्वंद्रव्यीयसंयुक्तत्वं ॥ तच्चेंद्रियावयवेनास्तीतिवाच्यं ॥ दीपादावतिप्रसंगवारणायातींद्रियपदवैय्यर्थ्यापत्तेः ॥ द्रव्यीयेंद्रियसंयोगस्यज्ञानकारणत्वेमानाभावेनासंभवाच्च ॥ नचमनःसंयोगस्यकारणत्वात्तद्वाघ्राणद्रव्यीयसंयोगस्यापिकारणत्वमितिवाच्यं ॥ घ्राणादिविषयसंयोगस्यहेतुत्वेनमनोविषयसंयोगस्यापिहेतुत्वापत्तेः ॥ नचत्वक्द्रव्यीयसंयोगस्यहेतुत्वात्तु ॥ घ्राणद्रव्यीयसंयोगस्यापिहेतुतेतिवाच्यं ॥ तस्येंद्रियतदधिष्ठानयोगत्वेनैवहेतुता ॥ नतुत्वक्द्रव्यीयसंयोग ॥४१॥

चेन ॥ गौरवान्मानाभावाच्च ॥ किंचभतींद्रियत्वमितिसात्मश्रोत्रयोपीतिचेन्न ॥ जन्यसाक्षात्कारतावच्छिन्नकार्यतानिरूपितकारणताश्रयत्वमितिनोक्तसकलदोषावकाशः ॥ तत्रेति ॥ चक्षुरादावतिव्याप्तिवारायगंधपदं ॥ कालादावतिव्याप्तिवारणायेंद्रियपदं ॥ नचोपलब्धिपदमनर्थकं ॥ यथोक्तविशेष्यविशेषणाभावेवैय्यर्थ्याभावादिति के ॥ सुरभ्यसुरभ्यनयोर्ग्रा ~~ग्रा~~ घ्राणेऽव्याप्तिवारणायतदित्यन्ये ॥ गंधसाधनमिंद्रियं घ्राणमित्येकलक्षणं ॥ उपलब्धिपदंतत्रप्रमाणसूचनायेत्यपरे ॥ पक्षेतुएवंसतिअसंभवः ॥ घ्राणेगंधाभावात् ॥ नतावत्सुरभिगंधः ॥ प्रमाणाभावात् ॥ नचतद्ग्राहकत्वमेवतथा ॥ एवंहिअसुरभिगंधमहकत्वंनसुरभिगंधःस्यात् ॥ नचेष्टापत्तिः ॥ अव्याप्येवृत्तिलाभात् ॥ तदनंगीकारादिति ॥ अतोवनाद्रव्यीयोपलब्धिपदं ॥ एवंचाग्निमूलमपिचंसमितिवदंति ॥ नन्वत्र घ्राणेंद्रियंतस्यप्रत्यक्षत्वेनेंद्रियलक्षणानाक्रांतत्वादतआह ॥ तच्चेति ॥ ननासेवग्रहणंएवेंद्रियलक्षणंभावइतिभावः ॥ अत्रेंद्रियलक्षणेइंद्रियेषुसाधनेत्वमसाधारणकारणत्वंनानामनस्त्वप्रसंगादितिध्येयं ॥ नन्विति ॥ तेऽजातीयगुणवदित्यर्थः ॥ रूपादिष्विति ॥ अत्रघ्राणव्यभिचारवारणायत्वसत्येति ॥ एवंमनसिव्यभिचारःअतआह ॥ नमनस्येवेति ॥ तावपि

चस्य रूपादिसिद्धिः॥ रसत्वस्यापि व्यंजकत्वात्तूष्णतण्डुलरूपादिष्विति॥ गन्धनिवर्त्यसन्नि
कर्षव्याप्तिचानवयवाश्रयद्रव्यपदमात्रबोध्ये॥ रूपरसयोर्मध्येऽयमेतावतैव संभेदस्य
अनुपपन्नमितिचेत्॥ करणसाध्यादिति॥ असाधारणकारणसाध्यादित्यर्थः॥ तेनम
नःस्पर्शीयादिनानाश्रयेतिरमिति ध्येयं॥ प्रयोजनेति॥ स्निग्ध्यबुध्यवस्थिधर्मवप्रयोजनमि
त्यर्थः॥ सुवर्णमिति॥ ननुपीतत्वपक्वत्वादुष्णतण्डुलसुवर्णपार्थिवमेवेति चेन्न॥ अत्रायं संदे
पः॥ पार्थिवत्वाभिमतेऽप्यतैजसाग्निसंयोगसतिभस्मानारंभकत्वात्तूदनोद्भिदादिद्रव्य
संयुक्तं वाच्यं॥ नच द्रव्यं न पार्थिवं दाहविनोद्भिदात्वात्तु॥ नजलं नैमित्तकद्रवत्ववत्त्वात्तु॥ रूपव
त्वान्नवायवादीति॥ परिशेषात्तेजस्त्वसिद्धिरिति॥ चक्षुरिंद्रियमिति॥ तत्राद्भूतस्पर्शा
नुपगमे चाक्षुषत्वस्पर्शानित्वापत्तेरितिभावः॥ प्रदीपेति॥ नचतदपि सुवर्णन्तु अग्निसं
तप्तमिवकृतोनस्यादितिवाच्यं॥ तद्वदेवस्पार्शनित्वापत्तेरितिभावः॥ सत्वेति॥ प्रत्य
क्षत्वेतद्भूतसेरव्यादीनांप्रत्यक्षतास्यादितिभावः॥ तस्यद्व्यणुकानीति॥ नचतस्यपरमा
णुत्रयरूपसमवायिकर्थमनेतिवाच्यं॥ परमाणुद्वयसंयोगसतिद्व्यणुकोत्पत्तेरावश्य ॥४२॥
कत्वेनतत्रैवान्यथासिद्धेर्वा तु॥ अन्यथाघटेतत्वापत्तेरिति॥ कारणगुणाः समवा

यिकारणगुणाः कार्यगुणानभपाकजद्विभिन्नाकार्यगुणाइत्यर्थः॥ वेगरहितस्यचद्रव
द्रव्यसंयोगानोदनं॥ स्पर्शवद्वेगवद्द्रव्यसंयोगाभिघातः॥ तद्भयंजातिरेवेत्यन्ये॥ एकस्या
ति॥ असमवायिकारणसंयोगाभावादिसाद्वायः॥ सामान्यवत्वेसतीति॥ एतच्चरूपादावति
व्याप्तिवारणाय॥ तन्मात्रंचभाकाशादौगतं॥ अतःइंद्रियग्राह्यत्वादिति॥ सामान्यवत्वेसति
इंद्रियग्राह्यत्वंदिसुकेघटादौगतं॥ अतःएकेति॥ एकमात्रेत्यर्थः॥ तावद्युक्तेआत्मनिगतं
अतोवाह्येति॥ योगिबाह्येकेंद्रियग्राह्यत्वंसामान्यवत्वंगगनेपीयत्नुकं॥ अस्मदादीति
लौकिकप्रत्यासत्तिपुरस्कारेणेत्यर्थः॥ तेनप्रत्यासत्तिपुरस्कारेणेत्यर्थः॥ स्मदादिबा
ह्यकेंद्रियग्राह्यत्वमपिनगगनेव्यभिचारतादवस्थ्यं॥ नचप्रभादौव्यभिचारः॥ एकेंद्रिय
ग्राह्यत्वेनएकमात्रेंद्रियग्राह्यजातिमत्त्वस्यविवक्षितत्वात्तु॥ अतएवएकमात्रेंद्रियग्राह्य
घटेनव्यभिचारः॥ दिग्विपरीतेति॥ दिगंडान्यस्यर्थः॥ ननुकालएवतन्निमित्तंस्यादतभा
ह॥ पूर्वस्मिन्निति॥ तादवस्थ्यात्तूतादवस्थ्यप्रसंगइत्यर्थः॥ अत्रसर्वानुप्रतीतिर्न्यायः॥
कालस्यसर्वाधारत्वादितिभावः॥ स्मृतिदाढर्यायमुनयेत्यनेनानानात्वमाह॥ सत्त्वेति॥ सामान्यवानिति॥ जातिमानित्यर्थः॥ एतच्चसामान्यादावतिप्रसंगवारणाय॥ असा

मवायिकारणं समवायिकारणाभिन्नइत्यर्थः॥ एतच्च द्रव्यव्यतिव्याप्तिवारणाय अस्पर्शवत्वा
कर्मभिन्नइत्यर्थः॥ इदं च कर्मव्यतिव्याप्तिवारणाय॥ ननु द्रव्यनिरूपणात्प्रागेव गुण
निरूपणं कुतोऽनुक्तेमनआह॥ सचेति॥ तथा चोपजीव्यत्वात्तूद्देशमेवप्रथमंनिरूपित
मितिभावः॥ तत्रेति॥ गुणःरूपमिसुक्तेसंयोगादौगतंअतोविशेषपदं॥ तावतासुक्तेर
सगतं॥ अतःचक्षुर्ग्राह्येति॥ तावतासुक्तेस्नेहगतं॥ तदर्थमात्रेति॥ चक्षुर्मात्रग्राह्येरूपमि
सुक्तेरूपत्वेतिव्याप्तिः॥ तदर्थंगुणपदं॥ चक्षुर्मात्रग्राह्यगुणोरूपमिसुक्तेत्रग्राह्यमि
संयोगगतं॥ अतःविशेषेति॥ ननुपरमाणुरूपेअव्याप्तिः॥ तस्याअतीन्द्रियत्वात्तूइतिचे
न्न॥ चक्षुर्मात्रग्राह्यविशेषगुणावृत्तिगुणत्वभिन्नगुणत्वव्याप्यजातिमत्त्वंविवक्षितमि
तिकेचित्तु॥ तन्न॥ चक्षुर्मात्रेन्द्रियग्राह्यत्वविशेषगुणस्यवाजातिर्वा॥ नाद्यः॥ चक्षुर्मा
त्रगृहीतविनष्टस्नेहमादायस्नेहमात्रेतिप्रसंगात्तू॥ नद्वितीयः॥ नैयर्थ्यप्रसंगात्तू॥
चक्षुर्मात्रग्राह्यजातिमत्त्वस्यसुरभित्वादिति॥ तस्माद्विशेषगुणः गुणोविशेषइत्यर्थः॥
गुणेचविशेषचक्षुर्मात्रग्राह्यजातिमत्त्वमितिनकाप्यनुपपत्तिरितिसारः॥ नमधुनि
रसनेन्द्रियग्राह्यजातिमान्रसइत्यर्थः॥ एवमगंधेपि॥ प्रसक्षाइति॥ नचसुवर्णरूप ॥४३॥

स्यप्रसक्तापत्तिः॥ अनभिभूतइत्यस्यापिविशेषणीयत्वात्तू॥ नचसुवर्णरूपस्यअप्रसक्तत्व
चक्षुषाप्रवृत्तिर्नस्यात्तू॥ रूपपुरस्कारेणैवतस्यप्रवृत्तेरितिवाच्यं॥ उपेक्षकपुरस्कारेणव
तत्रतत्प्रवृत्तिसंभवात्तू॥ नचतर्हिघटादिरूपपुरस्कारेणवायावपितत्प्रवृत्तिरितिवाच्यं॥ गा
ढेऽनुद्भूतरूपस्यापितत्प्रवृत्तौप्रयोजकत्वादितिदिक्तू॥ एकादीति॥ एकद्वित्वबहुत्वव्यवहारा सा
साधारणविषयोगुणोभंसंख्येयर्थः॥ एवमगंधेपि॥ असाधारणकारणंयद्द्रव्यंअसाधारण
विषयपरं॥ तेनपरमाणुसंख्यादौनाव्याप्तिरितिभावः॥ द्व्यणुकपरिमाणमिति॥ ननुद्व्य
णुकपरिमाणस्यपरमाणुपरिमाणमेवअसमवायिकारणमस्तुसमवायिकारणगतं
परिमाणंकार्यगतपरिमाणंप्रतिजनकत्वस्यघटादिच्छेकृप्तत्वादितिचेत्तू॥ अत्रवदं
तिः॥ द्व्यणुकपरिमाणंयदिपरमाणुपरिमाणमसमवायिस्यात्तूतदापरमाणुपरि
माणापेक्षयाद्व्यणुकपरिमाणंउत्कृष्टंस्यादितिपरमाणुत्वमेवतत्रासमवायिका
रणमितितन्न॥ हस्वपरिमाणावयवानांघटादिपरिमाणंअवयवगतपरि
माणस्यात्कन्यायेनासमवायित्वाभावापत्तेः॥ अन्येतूपरमाणुपरिमाणंजानंभकं

नित्यपरिमाणवत्तु ॥ गगनपरिमाणवदिति अनुमानमाहुः ॥ तदपि न ॥ एवं हि परमाणुर्हि
तेनारंभकं नित्यं गरिष्ठत्वात् काला काशादिर्हि तथा दृष्टेनानुमानेन हि तस्याप्यसमवायि
त्वं न स्यादिति ॥ अत्रेदं प्रतिभाति ॥ एतदसत् महदणुद्रव्यपरिमाणं च द्व्यणुकपरिमाणं च द्व्यणुकं ॥ तथा च य
थापटादिपरिमाणं समवायिकारणपरिमाणत्वात्सिध्यतः ॥ परमा
णुपरिमाणं न समवायीत्युच्यते ॥ तथा च द्व्यणुकपरिमाणगतनीरूप्याया असमवायित्वसि
द्धेः ॥ परमाणुपरिमाणस्यापि समवायिकारणगतसंख्याया समवायिकारणीपरमाणुप
रिमाणं न समवायिकारणं द्व्यणुकं वा पन्नेरिति ॥ पृथक्त्वमिति ॥ नन्वन्योन्याभावः पृथक्त्वं ॥
न गुणः प्रमाणाभावादिति चेन्न ॥ विहिमुखप्रपञ्चतो नञन्योन्याभावत्वसिद्धेः ॥ किं च
घटावधिकः पृथक्त्वं अन्योन्याभावात्मा सन् घटाश्रितिरिक्तं प्रतिपदार्थं तिन्नमेकमनेकं वा ॥ ने
नाद्यः ॥ अधिकरणभेदेन अभावभेदानंगीकारात् ॥ नाद्यः ॥ घटादौ पृथक्त्वे निश्चितस्य
भावस्संशयाभावापत्तेः ॥ न च यद्धि पृथक्त्वं गुणः तद्गुणादौ कथं तदवहारइति वाच्यं
संख्यादिवत्तद्वहि ॥ अतएव संयोगाभाव एव विभागो वा नत्वतिरिक्त इति परास्तं ॥ सं ॥४४॥

युक्तयोर्न विभक्तयोश्च तद्व्यवहारादिति हि कृ ॥ त्रिविधइति ॥ ननु कथं त्रैविध्यं कर्मणस्संयोगत्वेन चकारणत्वेन चद्वैविध्यउचितत्वादिति चेन्न ॥ स्वतंत्रच्छायापर्यनुयोज्यत्वात् तु ॥ अन्यथा कथात्वेन वादादीनामपि एकत्वापत्तेः ॥ ननु कथापि संयोगजः संयोगः ॥ न च कृततक्र
संयोगसत्तिन्नीरसंयुक्तमिति प्रतीतेः ॥ कृततक्रसंयोगात् न्नीरतक्रसंयोगः तथेति वा
च्यं ॥ एवं हि करतक्रसंयोगात् न्नीरतक्रसंयोगवत् वस्त्रतक्रसंयोगात् न्नीरतक्रसंयोगो
पपत्तेः ॥ न च तैलाकाशसंयोगः पटद्वयवस्त्रतक्रसंयोगमपि न्नीरतक्रसंयोगस्वत्व
प्रयोज्यः ॥ कारणाकारणसंयोगत्वेन संयोगस्य संयोगे प्रतिहतुत्वादिति वाच्यं ॥ अक्लृप्त
वदेवं ॥ तथापि कृततक्रसंयोगः करमात्रकर्मणः तक्रकर्मणः उभयकर्मणोवा ॥ नाद्यः ॥
करकर्मणः कालेन्नीरवकर्मणोप्यावश्यकतया तस्माद्वन्नीरतक्रसंयोगोत्पत्तिर्न संभवे
कृततक्रसंयोगस्यापि तत्रहेतुत्वे प्रमाणाभावात् ॥ नाद्वितीयः ॥ तक्रकर्मणः संयोगजनि
कालेन्नीरं किंरूपेपिहितं येन तक्रकर्मणैव न्नीरतक्रसंयोगमुपेक्ष्य कृततक्रसंयोगस्य
न्नीरतक्रसंयोगकारणत्वं च मंगीकर्तुमुत्सहेत ॥ अतएव नतृतीयः ॥ ननु कृततक्रसंयो
गः करमात्रकर्मणएव ॥ न च तद्धि दोषः ॥ अवयविकर्मणः यावदवयवकर्मनि

यतत्वेनैककरणमात्रकाले मूर्तीरेकर्मोभावात्॥ इतिचेन्न॥ अस्त्वेतद्यथातथा॥ करणकर्मणएवैक
रणात्तस्कुरत्वात्॥ नचैकसंगतकर्मणः तत्रसमवायिकारणत्वंनसंभवति॥ समवायि
कारणप्रयासत्वभावादितिवाच्यं॥ तंतुरूपस्यैवतत्त्वादितिचेन्न॥ अत्रब्रूमः॥ सामान्या
धिकरण्यसाधर्म्यजातीयत्वलाघवैर्नजातीयत्वलाघवैर्नचैकरतकसंयोगस्यैवतत्रकारणत्वं नतुकर्मणः॥
तज्जातीयत्वसामान्याधिकरण्यकारणसंभवेविजातीयासमानाधिकरणकारणकल्पन
स्यान्याय्यत्वाभावात्॥ एवंविभागेपिद्रष्टव्यमितिदिक्॥ आद्यइति॥ इदंचवेगेतिव्यति
रिक्तंज्ञेयं॥ कपालसंयोगेतिव्याप्तेरतआह॥ पतनेति॥ कालेतिव्याप्तेस्तदाह॥ असम
वायीति॥ असमवायित्वंचतस्तूपयोग्यत्वं॥ तेनानुत्पादितपतनेविनष्टेगुरुत्वेनाव्या
प्तिरिति॥ नचाद्यपदव्यर्थं॥ द्वितीयादिपतनेपिगुरुत्वमेवासमवायिमस्तुनुवेगः
अस्तुत्वादितिवाच्यं॥ गुरुत्वप्रमाणत्वेनायतदुपादानात्॥ अतएवयथोत्क्षेपणा
दिसंयोगितयापिसंगतादृतिः॥ एवंद्रवत्वेपि॥ श्रोत्रेति॥ श्रोत्रमात्रग्राह्यमनूद्भूतरूपत्व
नार्थं॥ नीलीति॥ भ्रमीवच्छेदनैकनाश्यासचोपवनादिसहकारिणश्चसमीपएवदिग्वि
दिग्वच्छेदनैकनाश्यः तेनाप्येवमिति॥ वीचीतरंगन्यायः॥ द्रव्यादिक्षुदिनाश्यइति ॥४१॥

कदंबगोलकन्यायः॥ ननुप्रथमन्यायेएकस्मिन्नाश्यद्रव्यजातयोमिथ्याः॥ द्वितीयतावच्छेद
कानुगोधात्॥ तथाच—तीनामन्यूनानतिरिक्तेतिनापनोबहुव्याकुलेस्मादितिचेन्न॥
घटइवनाश्येपिएकस्याइवजातेर्नानाकारव्यंग्यतावच्छेदकत्वादिति॥ अत्रवदंति॥ कद
ंबगोलकन्यायेग्रंथकृतोऽनवच्छेदः॥ तद्धीर्हितत्रानंतनाश्यकल्पनापत्तेः॥ यएवनाश्यः स
याश्रुतःसमयापीतिप्रसक्तेर्ज्ञानेभोगविषयनाकलनंचेति॥ वयंतु॥ यवच्छिन्नोयं
विकल्पः॥ यदाद्रव्यप्रागभावःतदासामग्रीबलेनद्रव्यनाश्यत्वंत्रैलोक्येपिदुर्निवार्यं॥
यदातुयकएवप्रागभावःतदाएकसामग्यभेदादिवदामः॥ नाद्यइति॥ इदंतुबोध्यं॥
यत्राद्यएवनाश्यःश्रोत्रावच्छेदोसंभवति॥ तत्रोर्ध्वपिगंधेनइत्यवधेयं॥ उपायेनेति॥ न
नुचरमनाश्यस्यक्षणिकत्वांगीकारेनचरमनाश्यक्षणएवउभयनाशकोस्तु
तिचेन्न॥ क्षणिकत्वेतस्यप्रसक्तत्वेनस्यात्॥ विषयरूपकारणाभावात्॥ कस्यचिज्जीव
त्वेनिरोपः॥ प्रसक्तेरिति॥ सामान्यज्ञानेप्रत्यासत्तेपुरस्कारेणेति॥ यद्वाज्ञानसामा
न्यान्यप्रत्यासत्तिजन्यप्रसक्तविषयाइत्यर्थः॥ अथेत्यनि॥ अथप्रकाशिकोनामज्ञानं॥ तथा
चज्ञानंबुद्धिः स्वरूपलक्षणंचेतनं॥ अभेदेनस्वस्यस्वस्मिन्नपिवृत्तेरितरभेदसाध

नमपिसुस्थं॥एवमग्रेपि॥पडिति॥एतन्मध्यनिविकल्पकजीवनयोनिप्रयत्नः॥ईश्वरा
तेघादयश्चसाध्याः॥आगमेति॥पापकारीपापोभवतीतिश्रुतिः धर्मश्चगतिकीर्तनादिसा
दिश्रुतिश्चेत्यर्थः॥देवदत्तेति॥इदंचपदंअन्यदीयत्रागीरेणातोबाधवारणाय॥आर्थं
चत्रागीरंपक्षःतेनान्यत्रकृतत्रागीरादौनान्यत्रलक्षणेनसिध्यसाधनतेत्यर्थः॥सा
ध्यंचेश्वरज्ञानादिनासिध्यसाधनवारणायदेवदत्तपदं॥देवदत्तपरिमाणादिना
र्थांतरवारणायविशेषपदं॥नचबाधादेवनार्थांतरमितिवाच्यं॥बाधस्येवबार
णायतदुपादानात्॥वक्तृत्वक्त॥उद्देश्यस्यसिध्यर्थमेवतदुपादानात्॥इतिवाच्यं॥
हेतोकालादौव्यभिचारवारणायहेतुपदं॥यत्रदत्तत्रागीरेव्यभिचारवारणायतुदेव
दत्तपदं॥यत्रदत्तनिमित्तकत्रगादौदेवदत्तभोगहेतुश्चैत्रेलक्षणसमवान्नव्यभिचारइ
तिद्रष्टव्यं॥प्रयत्नादीनामिति॥तन्मतेतज्जन्मनीयत्नाभावात्॥तज्जन्मनीयएवनाश्यः
तस्यविनष्टस्यह्यर्थंविनानसंभवतीत्यदृष्टस्यावश्यकत्वादिति भावः॥स्वाश्रयेति
स्वस्याश्रयोनसोस्वाश्रयद्रव्यमेवस्वात्तत्प्राक्कालीनावस्थापादकः संस्कारः॥वेगस्य
क्रियाहेतुत्वात्॥भावनायाश्च॥ज्ञानजनकत्वात्॥स्थितस्थापकस्योत्पन्नत्वात्॥

पूर्वावस्थाजनकत्वादितिभावः॥वेगेकिंप्रमाणमतआह॥क्रियेति॥क्रियानिरपेक्षोवेग
नैसापेक्षनेदमुत्तरमितिचेन्न॥वेगेनहरिणागतइतिप्रतीत्याक्रियानिरपेक्षस्यतस्यसि
ध्यतीतिभावः॥ननुभावनायाःकिंमानमतआह॥अनुभवेति॥स्मृतिजनकानुभवव्यापा
रतयासिध्यतिसाह्यायः॥तृतीयमानमाह॥अन्यथेति॥चलनेति॥स्वरूपलक्षणमतत्॥
द्रव्यमात्रस्यत्रमात्रपदंव्यवच्छेदार्थंद्रष्टव्यं॥ननुकर्मैवभ्रमतिदिक्कालौनास्तीतिचेन्न॥विस्मृ
तत्रीलोसिनचतइतिप्रत्यक्षस्यसंयोगोगतइतिप्रत्यक्षस्यविभागोविषयइतिवाच्यं॥संबंध्य
प्रत्यक्षेसंबंधिविषयकतयाप्रतीतेरनुदयात्तूष्णीमिति॥सामान्यलक्षणमाह॥निरपे
क्षमिति॥एतच्चसंयोगेतिव्याप्तिवारणाय॥एकपदंस्वरूपकथनार्थं॥पूर्वोक्तद्वितीयलक्षण
स्मरणायवाअनेति॥एतच्चनित्यद्रव्यादावतिव्याप्तिवारणाय॥अनेकसमवेतार्थंसमा
तःसमवायेतिव्याप्तिरितिभावः॥अनेकसमवेतत्वमपिस्वाश्रयसमवेतयोगिकान्यो
न्याभावावितिसमवेतत्वेनलघनेकत्वसंख्यावसमवेतत्वे॥गुणादावतिव्याप्तेरितिसवधर्यं॥
विधीति॥उपलक्षणमत्तत्वं॥अन्योन्याश्रयोपिद्रष्टव्यं॥नचगोपदार्थज्ञानेचोत्कर्ष
वहाचात्॥गोर्भिन्नमितिदिक्॥यावृत्तीति॥सामान्येतिव्याप्तिवारणायमात्रपदं॥

उत्पत्तेरिति॥अभावपदेनसंसर्गाभावपदं॥अभावःप्रागभावइत्युक्तेघटार्थतायाभावेगते॥अतःकार्यस्येति॥तथापिघटार्थतायाभावेगते॥अतःकारणमितिं॥समवायिकारणमित्यर्थः॥तर्हिसंसर्गगते॥अतःउत्पत्तेःप्रागीति॥नन्वत्रकपालत्वस्यप्रागभावघटितत्वेनात्माश्रयइतिचेन्न॥गंधानाधारसमवायानाधानाभावत्वंप्रागभावत्वमित्यत्रतात्पर्यात्॥कार्यस्येति॥अनिमित्तकत्वेनेत्यभावादितिभावः॥उत्पन्नस्येति॥उत्पत्तुंप्रागवस्थायांसमवायिकारणनिष्ठकार्यप्रतियोगिकसंसर्गाभावोघटनः॥पदकृत्यंपूर्ववत्॥स्वरूपेति॥अयंचप्रायोवादः॥सर्वशब्दस्ययथार्थोपगमत्वादिति॥सचेति॥समानाधिकरणदुःखप्रागभावासमानकालीनदुःखनिवृत्तिर्मुक्तिरित्यत्रतात्पर्यं॥एकस्मिन्निति॥एकस्मिन्नुत्पाद्यवहितप्राक्कालेज्ञातनानार्थावगमःसंशयः॥तेनेदंनजमितिज्ञानमचातिव्याप्तिरितिद्रष्टव्यं॥यनेति॥इच्छाविषयःप्रयोजनमित्यर्थः॥वादीति॥साध्यसाधनतयासंप्रतिपन्नमित्यर्थः॥तत्रेति॥साध्यविशेषणकपक्षविशेष्यकप्रतीतिजनकःन्यायावयवःप्रतिज्ञेत्यर्थः॥व्याप्यमिधायेकानयवःउदाहरणमित्याभिप्रेत्याह॥सव्याप्तीति॥पक्षइति॥लिंगपरामर्शजनकावयवःउपनयइत्यर्थः॥हेतु॥४७॥

संबंधेनेत्यधिकंपूरयित्वाप्रतिज्ञालक्षणमेवनिगमनलक्षणंद्रष्टव्यं॥अयंचेति॥अनेनव्याप्तिगर्भकांतकांतरमस्तीतिध्वनितं॥तदाकाशस्यवह्नयवच्छिन्नाजन्यत्वंसतिवह्निसमवहिताजन्यःस्यादजन्यःस्यादितिद्रष्टव्यं॥नचेति॥प्रमाद्वयमितिन्यायः॥निगृहीतानामितिं॥दोषाणामित्यर्थः॥उभयेति॥वादिप्रतिवादिपक्षेत्यर्थः॥एतच्चविनंडायामितिप्रसंगवारणाय॥वादेतन्निगमस्यविजगीषुपदं॥कथायामिति॥घटपटसंधैर्दंडेप्रसंगवारणायवाकेति॥स्वाभाविकनाकस्मिकदर्शनतद्वारणायनानेति॥उक्तानामिति॥हेत्वादिलक्षणरहितानांहेत्वाभासानामित्यत्रतात्पर्यं॥प्रतीतिःप्रमितिः॥नचसध्येतावपिकदाचिल्लमितिविरहादसिध्यतादितिवाच्यं॥केचिदिष्टापत्तिरित्याहुः॥वक्तृतक्कं॥सध्येनोक्तदोषेणनाद्रियतइतिविरहः॥अतःईश्वरस्येवताद्दशप्रमितीतिद्रष्टव्यं॥नचताद्दशप्रमितिर्विनश्यत्कारणाभावव्यंग्यस्वरूपस्तत्तत्प्रतिबंधकत्ववाच्यतथाचव्यभिचारादत्रयत्रवातभाविन्यापजीव्यत्वादितिवाच्यं॥ज्ञानेनुपजीव्यत्वेपिस्वरूपेणोपजीव्यत्वादितिभावः॥यथेति॥यद्यपीदमपार्थकंस्वमतेतथापिजीर्णमतेनुकमित्यवधेयं॥यद्वाएवदेवास्वरसादाह॥अन्योन्यापीति॥अन्यायमविद्वानूचुरिति॥आचार्यमुद्दिश्येति॥मैवमिति॥आश्रयेसतीतिन्यायः॥तेनाश्रयासिद्धिनि

स्तः॥ ननु असिद्धित्वमेवाह इति अनुपपन्नं॥ भागासिद्धिविरोधासिद्धादीनामपरेषां सत्वात्
आह॥ भागासिद्धइत्यादिनासत्यमित्येतेन॥ अन्यव्यवच्छेदेनेति॥ व्यभिचारव्यवच्छेदेनेत्य
र्थः॥ इदंचापादितः॥ वक्तव्यमिति॥ असमर्थविशेषणविशेष्ययोर्व्याप्त्यासिद्धेतभेदेन
इत्यवधेयं॥ व्याप्त्यासिद्धलक्षणमाह॥ व्याप्तेति॥ विरुद्धलक्षणं प्रतिजानीते॥ सं
नायेति॥ साधारणानैकांतिकस्यसाधारणधर्मत्वेनसंशयहेतुत्वं॥ द्वितीयस्यतुसाधा
रणधर्मत्वेनेतिभावः॥ यस्येति॥ अत्रसमबलमितिशेषःपूरणीयः॥ तेकृत्यंचदर्शि
तंप्राक्॥ कालात्ययापदिष्टलक्षणमाह॥ यस्येति॥ ननुपंचहेत्वाभासगतेअतिव्याप्ति
दोनास्त्वाहतआह॥ येपीत्यादिना॥ छललक्षणयतेन॥ छलंत्रिविधं॥ वाक्छलंसा
मान्यछलंचेति॥ तत्रविस्तरभयात्तुवाक्छलमवलक्षणाद्वाभ्यांप्र
तीयते॥ अभिप्रायांतरेणेति॥ उपचारछलंतुदर्शयतारूपप्रयुक्तस्यवाक्छस्यदर्श
मारूपदूषणाभिधाने॥ मंचाक्रोशंतीत्युक्तेकथमचेतनेषुमंचेषुक्रोशनमिति॥ सा
मान्यछलंतुसंभावनामात्रेणप्रयुक्तस्यकस्यचित्सामान्यस्यानभिमतस्यदूषणाभास
इत्यादूषणाभिधाने॥ यथाब्राह्मणोऽयंनवेदाध्यायीवक्तृत्वान्नियमः॥ अतादृग्नानाहीन

तेषांदर्शनानिष्प्रयोजनत्वंस्वव्याघातं॥ ननुयदिविस्तरभयाज्ज्ञासादीनांसविशेषाणां
रूपंतदात्मादीनांवारंवारंयेनिरूपणेकथंनविस्तरः॥ नहिसंभवति॥ केषांचिद्वारंवारंनि
रूपणेनविस्तरःकेषांचित्तूएकवारमपिनिरूपणेविस्तारइसतआह॥ इहेति॥ ॥
इतिश्रीवेदांतचक्रचूडामणिश्रीमद्गंगाधरात्मजश्रीमन्नारायणमिश्रविरचितायां
तर्कभाषाव्याख्यासमाप्ता॥ ॥छ॥छ॥ ॥छ॥ ॥छ॥छ॥ ॥छ॥ ॥
बिंदुर्द्विर्विसर्गवीथिकाशृंगपंक्तिपदभेददूषितं॥ हस्तेवगजमबुधिपूर्वकंक्षं
तुमर्हथसमीक्ष्यसज्जनाः॥१॥ ॥छ॥छ॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

तर्कभाषा प्रत्यक्षम्